ऐसा लिखा है । यहांपर कीर्ति यशका उपलक्षण है । आक्रान्तविमानमार्गम्—विमानस्य मार्गः (ष० त०), आक्रान्तो विमानमार्गो येन, तत् (बहु०) । विमानका मार्ग कहनेसे यहाँपर आकाश जाना जाता है । हविर्गन्धि=हविषो गन्धः (ष० त०) हविर्गन्धो यस्याऽस्तीति, तत्, हविर्गन्ध+इनिः । त्रेताग्नि-धूमाऽग्रं=त्रित्वम् इता त्रेताः, "पृषोदरादीनि यथोपदिष्टम्" इससे एकत्वका निपात होकर "त्रेता" पद निष्पन्न होता है । अग्नित्रयभिदं त्रेता" इत्यमरः । अग्निशालामें दक्षिणाग्नि, गार्हपत्य और आवसथ्य ये तीन श्रौत अग्नियोंका आधान किया जाता है । इन तीनों अग्नियोंको "त्रेता" कहते हैं । त्रेता चाऽसौ अग्निः (क० धा०) । त्रेताऽग्नेः धूमः (ष० त०) तस्य अग्रं तत् (ष० त०) । घ्रात्वा="घ्रा गन्धोपादाने" धातुसे क्त्वा प्रत्यय हुआ है । रजोविमुक्तः=रजसो विमुक्तः (पं० त०) । लघिमानं=लघोर्भावो लघिमा, तम् । यहांपर लघु शब्द-से "पृथ्वादिभ्य इमनिज्वा" इस सूत्रसे इमनिच् प्रत्यय होकर 'लघिमन्" शब्द निष्पन्न होता है । समश्नुते=सम्+अशूङ्+त । उपजाति छन्द है ॥ ३७ ॥

एतन्मुनेर्मानिनि ! शातकर्णेः पञ्चाप्सरो विहारवारि ।
आभाति पर्यन्तवनं विदूरान्मेघान्तरालक्ष्यमिवेन्दुबिम्बम् ॥३८॥

अन्वयः—हे मानिनि ! शातकर्णेः[1] मुनेः पञ्चाप्सरो नाम पर्यन्तवनम् एतत् विहारवारि विदूरात् मेघाऽन्तराऽऽलक्ष्यम् इन्दुबिम्बम् इव आभाति ॥

व्याख्या—हे मानिनि = हे अभिमानिनि सीते !, शातकर्णेः = शातकर्णि-नामकस्य, मुनेः = तपस्विनः, पञ्चाऽसरो नाम = पञ्चाऽप्सरोनाम्ना प्रसिद्धं, पर्यन्तवनम् = उपान्ताऽरण्यम्, एतत् = इदं, विहारवारि = क्रीडासरः, विदूरात् = विप्रकृष्टप्रदेशात्, मेघाऽन्तराऽऽलक्ष्यं = वारिदमध्ये ईषद्दृश्यम्, इन्दुविम्बम् इव = चन्द्रमण्डलम् इव, आभाति = शोभते ॥ ३८ ॥

भावाऽर्थः—हे मानिनि सीते ! शातकर्णिमुनेः पञ्चाप्सरोनाम्ना प्रसिद्धं यस्य पर्यन्तेषु वनानि वर्तन्ते तादृशम् एतत् क्रीडासरो मेघमध्य ईषद्दर्शनीयं चन्द्रमण्डलमिव शोभते ॥ ३८ ॥

अनुवादः—हे मानिनि सीते ! शातकर्णि नामक मुनिका "पञ्चाऽप्सरस्" नामसे प्रसिद्ध, जिसके पर्यन्तोंमें वन है, ऐसा यह क्रीड़ाका तालाव दूरसे मेघों-के बीचमें कुछ दिखाई देनेवाले चन्द्रमण्डलके समान शोभित हो रहा है ॥३८॥

टिप्पणी—हे मानिनि = "मानश्चित्तसमुन्नतिः" इत्यमरः । प्रशस्तो मानः अस्या अस्तीति मानिनी, सत्सम्बुद्धौ । मान = इनि–ङीप् । शातकर्णे = शत-कर्णस्याऽपत्यं पुमान् शातकर्णिः, तस्य; यहाँपर "शतकर्ण" शब्दसे "अत इञ्" इस सूत्रसे इञ् प्रत्यय होकर "तद्धितेष्वचामादेः" इस सूत्रसे आदि अच्की वृद्धि हो गई है । पञ्चाऽप्सरः = पञ्च अप्सरो यस्मिस्तत् (बहु०) । "स्त्रियां बहुष्व-प्सरसः स्वर्वेश्या उर्वशीमुखा ।" इत्यमरः । पर्यन्तवनं = पर्यन्तेषु वनानि यस्य तत्, यहाँपर "सप्तमी विशेषणे बहुव्रीहौ" इस सूत्रमें "सप्तमी" पदसे ज्ञापित व्यधिकरणबहुव्रीहि हुआ है । विहारवारि—विहरणं विहारः, यहाँपर वि—उपसर्गपूर्वक "हृञ् हरणे" धातुसे "भावे" सूत्रसे भावमें घञ् प्रत्यय हुआ है। विहाराय वारि, (तादर्थ्ये चतुर्थी, चतुर्थीतत्पुरुषः) । मेघाऽन्तराऽऽलक्ष्यं—

---

१. वाल्मीकिरामायणे "शातकर्णिः" इत्यत्र "माण्डकर्णिः" दृश्यते । यथा—

"इदं पञ्चाऽप्सरो नाम तटाकं सार्वकालिकम् ।
निर्मितं तपसा राम मुनिना माण्डकर्णिना ॥"

(अरण्यकाण्डः, ११–११) ।

मेघानाम् अतन्तरम् (ष० त०), ईषत् लक्ष्यम् आलक्ष्यम् "कुगतिप्रादयः" इति समासः । "आङीषदर्थेऽभिव्याप्तौ" इत्यमरः । मेघाऽन्तरे आलक्ष्यम् (स० त०) । इन्दुविम्वम् इव = इन्दोः बिम्वम् (ष० त०) । इस श्लोक में उपमा अलङ्कार है । इन्द्रवज्रा छन्द है ॥ ३८ ॥

पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन्मृगैः सार्धमृषिर्मघोना ।
समाधिभीतेन किलोपनीनः पञ्चाप्सरोयौवनकूटबन्धम् ॥ ३९ ॥

अन्वयः—(हे सीते !) पुरा दर्भाङ्कुरमात्रवृत्तिः मृगैः सार्धं चरन् स ऋषिः समाधिभीतेन[1] मघोना पञ्चाऽप्सरोयौवनकूटवन्धम् उपनीतः किल ॥ ३९ ॥

व्याख्या—(हे सीते !) पुरा = पूर्वकाले, दर्भाङ्कुरमात्रवृत्तिः = कुशांऽकुरमात्राऽऽहारः, मृगैः = हरिणैः, सार्धं = सह, चरन् = गच्छन्, सः = पूर्वोक्तः, ऋषिः = मुनिः, शातकर्णिरित्यर्थः । समाधिभीतेन तपश्चरणत्रस्तेन, मघोना = इन्द्रेण, पञ्चाऽप्सरोयौवनकूटवन्धम् = अप्सरःपञ्चकताऽरुण्यकपटयन्त्रम्, उपनीतः = प्रापितः मृगसाहचर्यान्मृगवदेव बद्ध इति भावः ॥ ३९ ॥

भावार्थः—(हे सीते !) पूर्वकाले कुशाऽङ्कुरमात्राहारो मृगवृत्तिः स मुनिः तपश्चरणभीतेन देवेन्द्रेण पञ्च अप्सरसः प्रेष्य तपश्चरणान्निवारितः ॥ ३९ ॥

अनुवादः—हे सीते ! पूर्व समयमें केवल कुशोंका अंकुर खानेवाले और मृगोंके साथ विचरण करनेवाले उन मुनिको तपस्यासे डरनेवाले इन्द्रने पाँच अप्सराओं के यौवनरूप कपटयन्त्रमें फँसा दिया ॥ ३९ ॥

टिप्पणी—दर्भाङ्कुरमात्रवृत्तिः = दर्भाणाम् अङ्कुरः(ष० त०), दर्भाङ्कुर एव दर्भाङ्कुरमात्रम् (रूपक०), तदेव वृत्तिः (जीवनसाधनम्) यस्य सः (बहु०) । समाधिभीतेन = समाधेः भीतः, तेन, यहाँपर "भीत्राऽर्थानां भयहेतुः" इस सूत्रसे पञ्चमी होकर "भयमीतभीतिभिरिति वाच्यम्" इस वार्तिकसे पञ्चमीतत्पुरुष समास हुआ है । पञ्चाऽप्सरोयौवनकूटबन्धं—यूनो भावो यौवनम्, यहाँपर 'युवन्' शब्दसे "हायनाऽन्तयुवादिभ्योऽण्" इस सूत्रसे अण् प्रत्यय होकर "नस्तद्धिते" इससे टि (अन्) के लोपकी प्राप्ति थी पर "अन्" इस सूत्रसे उसका प्रकृतिभाव होकर वृद्धि हुई है । "तारुण्यं यौवनं समे ।" इत्यमरः । कूटस्य बन्धः (ष० त०) । पञ्चानाम् अप्सरसां यौवनम्, यहाँ पर "तद्धिता-

१. "भेदेन" इति पुस्तकाऽन्तरपाठः ।

ऽर्थोत्तरपदसमाहारे च" इस सूत्रसे उत्तरपदसमास हुआ है। पञ्चाऽप्सरोयौवनम् एव कूटबन्धः, तम् (रूपक०)। "उन्माथः कूटतन्त्रं स्यात्" इत्यमरः। शातकर्णि नामक मुनि मृगके साहचर्यके कारण मृगके समान पाशबद्ध हुए थे यह तात्पर्य है। इस श्लोकमें रूपक अलंकार है। उपजाति छन्द है ॥ ३९॥

तस्यायमन्तर्हितसौधभाजः प्रसक्तसङ्गीतमृदङ्गघोषः।
वियद्गतः पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ॥ ४० ॥

अन्वयः—(हे सीते !) अन्तर्हितसौधभाजः तस्य अयं[1] प्रसक्तसङ्गीतमृदंगघोषः[2] वियद्गतः (सन्) पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ॥ ४० ॥

व्याख्या—(हे सीते !) अन्तर्हितसौधभाजः = जलाऽन्तर्गतप्रासादगतस्य, तस्य = शातकर्णेः, अयम् = अनुभवगोचरः, प्रसक्तसङ्गीतमृदङ्गघोषः सन्ततसङ्गीतमुरजशब्दः, वियद्गतः = आकाशप्राप्तः (सन्), पुष्पकचन्द्रशालाः = विमानशिरोगृहाणि, क्षणं = कञ्चित्कालं, प्रतिश्रुन्मुखराः = प्रतिध्वानैः ध्वनन्तीः, करोति = विदधाति ॥ ४० ॥

भावार्थः—हे सीते ! जलाऽन्तर्गतप्रसादस्थितस्य तस्य शातकर्णेः सन्ततसङ्गीतमुरजध्वनिराकाशव्यापी सन् पुष्पकविमानचन्द्रशालाः कञ्चित्कालं यावत् प्रतिध्वनिभिः शब्दायमानाः करोति ॥ ४० ॥

अनुवादः—हे सीते ! जलके भीतर महलमें रहनेवाले उन शातकर्णि मुनि के प्रचलित संगीतकी पखावजका शब्द आकाशमें प्राप्त होकर पुष्पक विमानके ऊर्ध्वभाग (छत) को कुछ समय तक प्रतिध्वनिसे शब्दायमान कर रहा है ॥

टिप्पणी—अन्तर्हितसौधभाजः—सुधा (लेपः) अस्याऽस्तीति सौधः, यहाँ पर "ज्योत्स्नाऽऽदिभ्य उपसंख्यानम्" इस वार्तिकसे अण् प्रत्यय हुआ है, "सौधोऽस्त्री राजसदनम्" इत्यमरः। अन्तर्हितश्चाऽसौ सौधः (क० धा०)। अन्तर्हितसौधं भजतीति अन्तर्हितसौधभाक्, तस्य, यहाँपर अन्तर्हितसौध—उपपदपूर्वक "भज सेवायाम्" धातुसे "भजो ण्विः" इस सूत्रसे ण्वि प्रत्यय हुआ है। (उपपदसमासः)। प्रसक्तसङ्गीतमृदङ्गघोषः—मृदङ्गस्य घोषः (ष० त०)। संगीते मृदङ्गघोषः (स० त०)। प्रसक्तश्चाऽसौ सङ्गीतमृदङ्गघोषः (क० धा०)।

"गीतं वाद्यं च नृत्यं च संगीतं त्रयमुच्यते।"

---

१. "प्रयुक्त" ति पुस्तकाऽन्तरपाठः।
२. "नाद" इति पुस्तकाऽन्तरपाठः।

इस उक्तिके अनुसार गीत, वाद्य और नृत्यको "सङ्गीत" कहते हैं। वियद्गतः = वियत् गतः, यहाँपर "द्वितीयाश्रिताऽतीतपतितगताऽत्यस्तप्राप्ताऽऽपन्नैः" इस सूत्रसे द्वितीयातत्पुरुष समास हुआ है। पुष्पकचन्द्रशालाः=पुष्पकस्य चन्द्रशालाः, ताः (ष० त०) "चन्द्रशाला शिरोगृहम्" इत्यमरः। "पुष्पक विमान" पहले उत्तरदिशाके लोकपाल कुवेरजीका था, उनके सौतेले भाई राक्षसराज रावणने उनसे छीनकर अपने पास रक्खा था। क्षणम् = "कालाऽध्वनोरत्यन्तसंयोगे" इस सूत्रसे कालके अत्यन्तसंयोगमें द्वितीया हुई है। प्रतिश्रुन्मुखराः = प्रतिश्रुद्भिः मुखराः, ताः (तृ० त०)। "स्त्री प्रतिश्रुत् प्रतिध्वाने" इत्यमरः। उपजाति छन्द है॥ ४० ॥

हविर्भुजामेधवतां चतुर्णां मध्ये ललाटन्तपसप्तसप्तिः।
असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥४१॥

अन्वयः—(हे सीते !) नाम्ना सुतीक्ष्णः चरितेन दान्तः असौ अपरः तपस्वी एधवतां चतुर्णां हविर्भूजां मध्ये ललाटन्तपसप्तसप्तिः (सन्) तपस्यति ॥

व्याख्या—(हे सीते !) नाम्ना = अभिधानेन, सुतीक्ष्णः, सुतीक्ष्णनामेति भावः। चरितेन = चरित्रेण, दान्तः = तपःक्लेशसह, असौ = दूरस्थः, अपरः = अन्यः, तपस्वी = तापसः, एधवताम् = इन्धनयुक्तानां, चतुर्णां = चतुःसंख्यकानां, दिक्चतुष्टयस्थितानामित्यर्थः। हविर्भुजाम् = अग्नीनां, मध्ये = अन्तरे, ललाटन्तपसप्तसप्तिः = सूर्याऽभिमुखः, सन्नित्यर्थः, तपस्यति = तपश्चरति ॥ ४१ ॥

भावार्थः—हे सीते ! सुतीक्ष्णनामकः तपःक्लेशसहोऽसावपरस्तापसश्चतुर्षुदिक्षु चतुरोऽग्नीनाधाय स्वयं सूर्याऽभिमुखः सन् तपश्चरति ॥ ४१ ॥

अनुवादः—हे सीते ! सुतीक्ष्ण नामवाले, तपस्याके क्लेशको सहनेवाले ये दूसरे तपस्वी, लकड़ियोंसे युक्त चार अग्नियोंके बीचमें ललाटको सन्तप्त करनेवाले सूर्यकी ओर अभिमुख होते हुए तपस्या कर रहे हैं॥ ४१ ॥

टिप्पणी—नाम्ना = यहाँपर "प्रकृत्यादिभ्य उपसंख्यानम्" इस वार्तिकसे तृतीया हुई है। सुतीक्ष्णः = सुतीक्ष्ण ऋषिने दण्डकारण्यमें पहले सीता, राम और लक्ष्मणका सत्कार किया था ऐसा वर्णन रामायणमें मिलता है। दान्तः =

१. "हि तप्स्ये" ति पुस्तकान्तरपाठः।

दमु + क्तः । "तपःक्लेशसहो दान्तः" इत्यमरः । तपस्वी = तपः अस्याऽस्तीति, 'तपस्' शब्दसे "तपःसहस्राभ्यां विनीनी" इस सूत्रसे विनिप्रत्यय होकर 'सु' विभक्तिमें "सौ च" इससे दीर्घ हुआ है। एधवताम् = एधाः सन्ति येषु ते एधवन्तः, तेषाम्, यहाँपर "एध" शब्दसे "तदस्याऽस्त्यस्मिन्निति मतुप्" इस सूत्रसे मतुप् (मत्) प्रत्यय होकर "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इससे "म" के स्थानमें "व" हुआ है।

"काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित् स्त्रियाम् ।" इत्यमरः । हविर्भुजां = हवींषि भुञ्जन्तीति हविर्भुजः तेषाम्, यहांपर "हविस्" = उपपदपूर्वक "भुज पालनाऽभ्यवहारयोः" धातुसे क्विप् प्रत्यय हो गया है (उपपदसमासः)। ललाटन्तपसप्तसप्तिः = ललाटं तपतीति ललाटन्तपः, यहाँपर 'ललाट' उपपदपूर्वक "तप संतापे" धातुसे "असूर्यललाटयोर्दृशितपोः" इस सूत्रसे "खश्" प्रत्यय होकर "अरुर्द्विषदजन्तस्य मुम्" इससे "मुम्" आगम हुआ है। (उपपदसमासः) सप्त सप्तयो यस्य स सप्तसप्तिः (बहु०) "वाजिवाहाऽर्वहयसैन्धवसप्तयः । "इत्यमरः । सूर्यके सात घाड़े हैं, इसलिए वे "सप्तसप्ति" कहलाते हैं। ललाटन्तपः सप्तसप्तिः यस्य सः (बहु०) । सूर्यको देखनेवाले पुरुषके ललाटमें अवश्य ही ताप होता है।

तपस्यति = तपश्चरति, यहाँपर "तपस्" शब्दसे "कर्मणो रोमन्थतपोभ्यां वर्तिचरोः" इससे क्यङ्प्रत्यय होकर "तपस्य" इस समुदायको 'सनाद्यन्ता धातवः" इससे धातुसंज्ञा होकर ङित् (ङकारकी इत्संज्ञा) होनेसे "अनुदात्तङित आत्मनेपदम्" इससे आत्मनेपदकी प्राप्ति थी परन्तु "तपसः परस्मैपदं च" इससे परस्मैपद हुआ । उपजाति छन्द है ॥ ४१ ॥

अमुं सहासप्रहितेक्षणानि व्याजार्धसन्दर्शितमेखलानि ।
नलं विकर्तुं जनितेन्द्रशङ्कं सुराङ्गनाविभ्रमचेष्टितानि ॥ ४२ ॥

अन्वयः—(हे सीते !) जनितेन्द्रशङ्कम् अमुं सहासप्रहितेक्षणानि व्याजाऽर्धसन्दर्शितमेखलानि सुराऽङ्गनाविभ्रमचेष्टितानि विकर्तुम् अलं न ॥ ४२ ॥

व्याख्या—(हे सीते !) जनितेन्द्रशङ्कम्=उत्पादितपुरुहूतसन्देहम्, अमुं=सुतीक्ष्णं, सहासप्रहितेक्षणानि=हास्यपूर्वकप्रेरितनेत्राणि, व्याजाऽर्धसन्दर्शितमेखलानि=अपदेशेषत्प्रदर्शितरशनानि, सुरांगनाविभ्रमचेष्टितानि=अप्सरोविलास-

चेष्टाः, विकर्तुं=स्खलयितुम्, अलं=समर्थानि, न=बभूवुः, इन्द्रप्रेषिता अप्सरसोऽपि सुतीक्ष्णस्य तपः स्खलयितुं न समर्था बभूवुरिति भावः ।। ४२ ।।

भावार्थः—हे सीते ! इन्द्रशङ्कां जनयन्तं सुतीक्ष्णं देवेन्द्रप्रेरिता अप्सरसः हासपूर्वककटाक्षादिभिः विलासचेष्टाभिरपि स्खलयितुं समर्था न बभूवुः ।।४२।।

अनुवादः—हे सीते ! तपस्यासे इन्द्रकी शङ्काको उत्पन्न करनेवाले सुतीक्ष्ण मुनिको हास्यपूर्वक कटाक्षोंसे और जिनमें बहानेसे मेखलाके अर्धभाग दिखलाये गये हैं अप्सराओंकी ऐसी विलासचेष्टाएँ भी तपस्यासे भ्रष्ट करनेके लिये समर्थ नहीं हुईं ।। ४२ ।।

टिप्पणी—जनितेन्द्रशङ्कम्–इन्द्रस्य शंका (ष० त०), जनिता इन्द्रशंका येन, तम् (बहु०) । सहासप्रहितेक्षणानि=हसनं हासः, हस+घञ् । हासेन सहितं सहासम्, (तुल्ययोगबहु०) ईक्षणानि येषु तानि (बहु०) । व्याजाऽर्धसन्दर्शितमेखलानि=अर्धं सन्दर्शिता (सुप्सुपा०) । "पुंस्यर्धोऽर्धं समेंऽशके" इत्यमरः । व्याजेन अर्धसन्दर्शिता (तृ० त०) व्याजाऽर्धसन्दर्शिता मेखला येषु तानि (बहु०) । सुराऽङ्गनाविभ्रमचेष्टितानि–प्रशस्तानि अङ्गानि आसां ता अंगनाः, "लोमादिपामादिपिच्छादिभ्यः शनेलचः" इस सूत्रसे "अंगात्कल्याणे" इस वार्तिकके अनुसार कल्याण अर्थमें न प्रत्यय और स्त्रीत्वविवक्षामें टाप् प्रत्यय हो गया है । सुराणाम् अंगनाः (ष० त०) । तासां विभ्रमाः (ष० त०) सुराऽङ्गनाविभ्रमा एव चेष्टितानि (रूपक०), विकर्तुं=वि+कृ+तुमुन् । अलम्= "अलं भूषणपर्याप्तिशक्तिवारणवाचकम् !" इत्यमरः, उपजाति छन्द है ।। ४२ ।।

एषोऽक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावम् ।
सभाजने मे[1]भुजमूर्ध्वबाहुः सव्येतरं[2]प्राध्वमितः प्रयुङ्क्ते ।। ४३ ।।

अन्वयः—(हे सीते !) ऊर्ध्वबाहुः एषः अक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावं सव्येतरं भुजं मे सभाजने इतः प्राध्वं प्रयुङ्क्ते ।।४३।।

१. उग्रतेजाः" इति पाठान्तरम् ।

२. प्रांशु" इति पाठान्तरम् ।

व्याख्या—(हे सीते !) ऊर्ध्वबाहुः = उपरिभुजः, एषः = सुतीक्ष्णः, अक्षमालावलयम् = अक्षमाल्यकंकणं, मृगाणां=हरिणानां, कण्डूयितारं=कण्डूविनोदकं, कुशसूचिलावं = दर्भसूचिच्छेदकं, सव्येतरं = वामेतरं, दक्षिणमिति भावः। भुजं=बाहुं, मे = मम, सभाजने = सम्माननिमित्ते, इतः = अत्र, प्राध्वं=प्रकृतानुकूलबन्धं, प्रयुङ्क्ते = प्रेरयति ।। ४३ ।।

भावार्थः—हे सीते ! ऊर्ध्वभुजोऽयं सुतीक्ष्णोऽक्षमालाधारिणं मृगाणां कण्डूतिमपनयन्तं कुशच्छेदकं दक्षिणं भुजं मत्सम्माननिमित्तं मदभिमुखं करोति ।।४३।।

अनुवादः—हे सीते ! ऊर्ध्वबाहु ये सुतीक्ष्ण मुनि, अक्षमालारूप वलयवाले मृगोंको खुजलानेवाले, कुशरूप सूइयोंको काटनेवाले दक्षिण बाहुको मेरे सम्मानके निमित्त मेरी ओर दिखा रहे हैं।

टिप्पणी—ऊर्ध्वबाहुः = ऊर्ध्वौ बाहुः यस्य सः (बहु०)। अक्षमालावलयं= अक्षाणां माला (ष० त०), सा एव वलयं यस्य तम् (बहु०)। "अक्षमाला" तान्त्रिकपरिभाषाके अनुसार 'अ' से 'क्ष' पर्यन्त वर्णोंकी मालाको कहते हैं, यहाँपर रुद्राक्षमाला प्रतीत होती है। मृगाणां = "कण्डूयितारम्" इस कृदन्त पदके योगमें "कर्तृकर्मणोः कृति" इस सूत्रसे कर्ममें षष्ठी हुई है। कण्डूयितारं= कण्डूयतीति कण्डूयिता, तम् "कण्डूञ् गात्रविघर्षणे" इस धातुसे 'ण्वुल्तृचौ' इस सूत्रसे तृच् प्रत्यय हुआ है। कुशसूचिलावं = कुशा एव सूचयः (रूपक०)। कुशसूचीः लुनातीति कुशसूचिलावः, तम्, कुशसूचि-उपपदपूर्वक "लूञ् छेदने" धातुसे "कर्मण्यण्" इस सूत्रसे अण् प्रत्यय हुआ है। अक्षमालाको धारण करनेसे मुनिकी जपशीलता, मृगोंको खुजलाने से प्राणियोंमें दया और कुशोंको काटनेसे उनकी कार्यक्षमता प्रतीत होती है। सव्येतरं = सव्यात् इतरः तम्। सव्यशब्दसे 'इतर' शब्दके योगमें "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इस सूत्रसे पञ्चमी होकर पञ्चमीतत्पुरुष समास हुआ है। "वामं शरीरं सव्यं स्यात्" इत्यमरः। सभाजने = "सभाजप्रीतिसेवनयोः" इस धातुसे ल्युट् प्रत्यय हुआ है "निमित्तात्कर्मयोगे" इस सूत्रसे सप्तमी हुई है। इतः = अस्मिन्निति, यहाँपर "इदम्" शब्दसे सार्वविभक्तिक तसि प्रत्यय हुआ है। प्राध्वम् = "आनुकूल्यार्थकं प्राध्वम्" इत्यमरः। यह अव्यय है। उपजाति छन्द है ।। ४३ ।।

वाचंयमत्वात्प्रणतिं ममैष कम्पेन किञ्चित्प्रतिगृह्य मूर्ध्नः ।
दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि सन्निधत्ते ॥ ४५ ॥

अन्वयः—(हे सीते !) एषः वाचंयमत्वात् मम प्रणतिं किंचित् मूर्ध्नः कम्पेन प्रतिगृह्य विमानव्यवधानमुक्ता दृष्टिं पुनः सहस्रार्ऽचिषि सन्निधत्ते ॥४४॥

व्याख्या—(हे सीते !) एषः = सुतीक्ष्णः, वाचंयमत्वात् = मौनव्रतित्वात्, मम = रामस्य, प्रणतिं = प्रणामं, किंचित् = ईषत्, मूर्ध्नः = शिरसः, कम्पेन = वेपथुना, प्रतिगृह्य = स्वीकृत्य, विमानव्यवधानमुक्तां = व्योमयानतिरोधानमुक्तां, दृष्टिं = नेत्रं, पुनः = भूयः, सहस्रार्ऽचिषि = सूर्ये, सन्निधत्ते = सम्यक् प्रवर्तयति ॥ ४४ ॥

भावार्ऽर्थः—हे सीते ! अयं सुतीक्ष्णो मौनव्रतित्वान्मदीयं प्रणामं स्तोकं शिरःकम्पेन प्रतिगृह्य पुष्पकव्यवधानरहितं नेत्रं पुनः सूर्ये प्रवर्तयति ॥ ४४ ॥

अनुवादः—हे सीते ! ये सुतीक्ष्ण ऋषि मौनव्रत लेनेसे मेरे प्रणामको शिर कुछ हिलानेसे स्वीकार कर पुष्पक विमानके व्यवधानसे छूटे हुए नेत्रोंको फिर सूर्यमें लगा रहे हैं ॥ ४४ ॥

टिप्पणी—वाचंयमत्वात् = वाचं यच्छतीति वाचंयमः, यहाँपर "वाच्"-उपपदपूर्वक "यमु उपरमे" धातुसे "वाचि यमो व्रते" इस सूत्रसे खच् प्रत्यय होकर "वाचंयमपुरन्दरौ च" इस सूत्रसे मुम् आगमका निपातन हुआ है। वाचंयमस्य भावो वाचंयमत्वं तस्मात् । प्रणतिं = प्र + नम् + क्तिन् । प्रतिगृह्य = प्रति + ग्रह + क्त्वा (ल्यप्) । विमानव्यवधानमुक्तां = विमानेन व्यवधानं (तृ० त०), तस्मात् मुक्ता ताम् (ष० त०) । सुतीक्ष्ण मुनि सूर्याभिमुख होकर तप कर रहे थे, इसी बीचमें रामसे आरूढ़ पुष्पक विमानने सूर्यको व्यवहित कर दिया, उस (विमान) के चले जानेसे मुनिने फिर नेत्रोंको सूर्याभिमुख किया यह तात्पर्य है। सहस्रार्ऽचिषि = सहस्रम् अर्चींषि (किरणाः) यस्य स सहस्रार्ऽचिः, तस्मिन् (बहु०) । "ज्वालाभासोर्न पुंस्यर्चिः" इत्यमरः । सन्निधत्ते = सं + नि + धा (त्र्) लट् (त) । उपजाति छन्द है ॥४४ ॥

अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।
चिराय सन्तर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत ॥५४॥

अन्वयः—(हे सीते !) शरण्यं पावनम् अदः तपोवनम् आहिताऽग्नेः शरभङ्गनाम्नः । यः चिराय अग्निं समिद्भिः सन्तर्प्य मन्त्रपूतां तनुम्, अपि अहौषीत् ॥ ४५ ॥

व्याख्या--(हे सीते !) शरण्यं=रक्षणसमर्थं, पावनं=पवित्रतासम्पादकम्, अदः=दूरतःदृश्यमानं, तपोवनं=तपःस्थानम्, आहिताग्नेः=अग्निहोत्रिणः, शरभङ्गनाम्नः=शरभंगनामकस्य मुनेः, अस्तीति शेषः । यः=शरभंगः, चिराय=बहुकालपर्यन्तम्, अग्निं=वह्निं, समिद्भिः=इन्धनैः, सन्तर्प्य=तर्पयित्वा, मन्त्रपूतां=मन्त्रशुद्धां, तनुम् अपि=शरीरम् अपि । अहौषीत्=हुतवान् ॥ ४५ ॥

भावाऽर्थः—हे सीते ! शरभंगनामकस्याऽग्निहोत्रिण इदं पावनं तपोवनमस्ति । यो बहुकालं यावत् काष्ठैरग्निं तर्पयित्वा शरीरमपि हुतवान् ॥ ४५ ॥

अनुवादः—हे सीते ! अग्निहोत्री शरभंग नामक मुनिका शरणागतोंका रक्षक पावन यह तपोवन है । जिन्होंने बहुत काल तक अग्निको समिधाओंसे तृप्त कर मन्त्रसे पवित्र अपने शरीरको भी हवन कर दिया था ॥ ४५ ॥

टिप्पणी—शरण्यं=शरणे साधु, "शरण" शब्दसे "तत्र साधुः" इस सूत्रसे यत् प्रत्यय हुआ है । पावनं=णिच्प्रत्ययाऽन्त 'पूङ् पवने" धातुसे "कृत्यल्युटो बहुलम्" इस सूत्रसे "बहुल" ग्रहण करनेके सामर्थ्यसे कर्तामें ल्युट् हुआ है । तपोवनं=तपसो वनम् (ष० त०) । आहिताऽग्निः,=आहिताः अग्नयः (दक्षिणाऽग्नि—गार्हपत्याहवनीयाः) येन सः आहिताग्नेः, तस्य, (बहु०) "वाऽऽहिताग्न्यादिषु" इस सूत्रसे विकल्पसे "आहित" शब्दका पूर्व निपात हुआ है, एक पक्षमें "अग्न्याहितः" ऐसा रूप भी बनता है । शरभंगनाम्नः=शरभंगो नाम यस्य स शरभंगनामा, तस्य (बहु०) । विराधको मारनेके अनन्तर रामचन्द्रजीने दण्डकारण्यकी यात्रामें शरभंग मुनिका आतिथ्य स्वीकार किया था। चिराय="चिरायचिररात्रायचिरस्याद्याश्चिरार्थकाः ।" इत्यमरः । यह अव्यय है । सन्तर्प्य=सं+तृप्+णिच्+क्त्वा (ल्यप्). मन्त्रपूतां=मन्त्रेण पूता, ताम् (तृ० त०) । अहौषीत्="हु दानाऽदनयोः" इस धातुसे लुङ् हुआ है "सिचि वृद्धिः परस्मैपदेषु" इससे वृद्धि हुई है । उपजाति छन्द है ॥ ४५ ॥

छायाविनीताध्वपरिश्रमेषु भूयिष्ठसम्भाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥ ४६ ॥

अन्वयः—(हे सीते !) अधुना तस्य अतिथीनां सपर्या छायाविनीताऽध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेषु अमीषु पादपेषु सुपुत्रेषु इव स्थिता ॥४६॥

व्याख्या—(हे सीते !) अधुना=अस्मिन् समये, तस्य=शरभङ्गस्य, अतिथीनाम्=आगन्तुकानां, सपर्या=पूजा, अतिथिपूजेति भावः । छायाविनीताऽध्वपरिश्रमेषु=छायाऽपनीतमार्गायासेषु, भूयिष्ठसंभाव्यफलेषु=बहुतमश्लाघ्यफलेषु, अमीषु=एतेषु, पादपेषु=वृक्षेषु, सुपुत्रेषु इव=उत्तमाऽऽत्मजेषु इव, स्थिता=विद्यमाना, अस्तीति शेषः । शरभङ्गस्याश्रमेऽतिथीनां पूजा तत्पुत्रैरिव वृक्षैरनुष्ठीयत इति भावः ॥ ४६ ॥

भावार्थः—हे सीते ! साम्प्रतं शरभङ्गस्याश्रमे छायाऽपनीतमार्गपरिश्रमैः प्रचुरफलशोभितैर्वृक्षैः सत्पुत्रैरिवाऽतिथीनां पूजा विधीयते ॥ ४६ ॥

अनुवादः—हे सीते ! इस समय शरभंगके आश्रममें अतिथियोंकी पूजा छायासे मार्गके परिश्रमको हटानेवाले प्रचुर श्लाघनीय फलोंसे युक्त सुपुत्रोंके समान इन वृक्षोंमें रह रही है ॥ ४६ ॥

टिप्पणी—अतिथीनाम्=अविद्यमाना (अनिश्चिता) तिथिर्येषां ते अतिथयः तेषाम् (नञ्बहु०) । द्विजाति गृहस्थोंके नित्यकर्म पञ्चमहायज्ञोंमें अतिथिपूजा भी एक यज्ञ है, जैसा कि भगवान् मनुने लिखा है—

"अध्यापनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥" (३–७०)

अर्थात् अध्यापन, ब्रह्मयज्ञ, पितरोंका नित्यश्राद्ध और तर्पण पितृयज्ञ, हवन, देवयज्ञ, बलिवैश्वदेव, भूतयज्ञ और अतिथिकी पूजा करना मनुष्ययज्ञ है । सपर्या="पूजा नमस्याऽपचितिः सपर्याऽर्चार्हणाः समा ।" इत्यमरः । छायाविनीताऽध्वपरिश्रमेषु=छायाभिर्विनीतः (तृ० त०), अध्वनः परिश्रमः (ष० त०), छायाविनीतः अध्वपरिश्रमः यैस्ते, तेषु (बहु०) । भूयिष्ठसंभाव्यफलेषु=भूयिष्ठानि संभाव्यानि फलानि येषां ते, तेषु (बहु०) । पादपेषु=पादैः (मूलैः) पिबन्तीति पादपाः, तेषु (पाद+पा+कः) । सुपुत्रेषु=शोभनाः

पुत्रः सुपुत्राः, तेषु, "कुगतिप्रादयः" इति समासः । स्थिता=स्था+क्तः+टाप् । उपजाति छन्द है ।। ४६ ।।

धारास्वनोद्‌गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।
बध्नाति मे बन्धुरगात्रि ! चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ।।४७।।

अन्वयः—धारास्वनोद्‌गारिदरीमुखः शृंगाऽग्रलग्नाऽम्बुदवप्रपङ्कः असौ चित्रकूटः हे वन्धुरगात्रि ! दृप्तः ककुद्मान् इव मे चक्षुः वध्नाति ।। ४७ ।।

व्याख्या—धारास्वनोद्‌गारिदरीमुखः=निर्झरधाराशब्दोद्‌गारिकन्दरमुखः नैरन्तर्यशब्दोद्‌गारिदरीवदनो वा, शृंगाऽग्रलग्नाम्बुदवप्रपङ्कः=शिखराऽग्रसम्बद्ध-मेघवप्रक्रीडासक्तपङ्कः विषाणाऽग्रसम्बद्धमेघवप्रक्रीडासक्तपङ्को वा, असौ=अयं, चित्रकूटः=चित्रकूटपर्वतः, हे वन्धुरगात्रि=उन्नताऽऽनताऽङ्गि, सीते ! दृप्तः=दर्पयुक्तः ककुद्मान् इव=वृषभ इव, मे=मम, चक्षुः=नेत्रं, बध्नाति=अनन्या-सक्तं करोति ।। ४७ ।।

भावार्थः—हे सीते ! अयं चित्रकूटो यत्र कन्दरं निर्झरधाराशब्देन प्रति-ध्वनितमस्ति, यत्र कूटाग्रे वप्रपङ्क इव मेघो लग्नोऽस्ति, स सदर्पो वृषभ इव मे नेत्रमाकर्षति ।। ४७ ।।

अनुवादः—निर्झरधाराओंके शब्द जिसके गुफारूप मुख निकाल रहे हैं किसके शिखरके अग्रभागमें वप्रपंकके समान मेघ लग रहा है ऐसा चित्रकूट पर्वत उन्नत और अवनत अवयवोंसे सम्पन्न होने वाली हे सीते ! डकारनेवाले और सींगके अग्रभागमें वप्रपंकसे युक्त दर्प-सम्पन्न सांड़के समान मेरे नेत्रोंको आकृष्ट कर रहा है ।। ४७ ।।

टिप्पणी—धारास्वनोद्‌गारिदरीमुखः—धाराणां (निर्झरधाराणाम्) स्वनः (ष० त०), तम्; अथवा धारया (नैरन्तर्येण) स्वनम् उद्गिरतीति धारास्वनोद्‌गारि, यहाँपर धारास्वन+उद्-उपसर्गपूर्वक "गॄ निगरणे" धातुसे णिनि प्रत्यय हुआ है । दरी एव मुखम् (रूपक०) । धारास्वनोद्‌गारि दरीमुखं यस्य सः (वहु०) । निर्झरधाराओंके अथवा 'नैरन्तर्यसे' शब्दको प्रकाश करनेवाली गुफारूप मुखवाला, इसका तात्पर्य चित्रकूट पर्वतसे है । चित्रकूट पर्वत प्रयागके निकटवर्ती है । शृंगाऽग्रलग्नाम्बुदवप्रपंकः=शृंगस्य (शिखरस्य विषाणस्य च) अग्रम् (ष० त०), तस्मिन् लग्नः (ष० त०) । अम्बु

ददातीति अम्बुदः, अम्बु + दा + कः, उपपदसमासः। शृङ्गाऽग्रलग्नः अम्बुद एव वप्रपङ्को यस्य सः (बहु०)। इस श्लोक में चित्रकूट पर्वत की सांड़से उपमा दी गई है। जिस तरह साँड़ डकारता है वैसे ही चित्रकूट पर्वतकी गुफारूप मुखसे झरनोंके शब्दका उद्गार हो रहा है। जैसे वप्र (मिट्टीके ढेर) में क्रीडा करनेपर साँड़के सींगमें पंक (कीचड़) लग जाता है उसी तरह इस (चित्रकूट) के शृङ्ग (चोटी) के अग्रभागमें मेघरूप वप्रपंक लग गया है इस प्रकार इस श्लोक में रूपक और उपमामें अंगांगिभाव होनेसे संसृष्टि अलंकार है। हे वन्धुरगात्रि=बन्धुराणि गात्राणि यस्याः सा वन्धुरगात्री तत्सम्बुद्धौ, (बहु०)। यहाँपर "गात्र" पदसे गात्राऽवय अंगोमें लक्षणा है। स्त्रीत्वविवक्षामें "अंगगात्रकण्ठेभ्यो वक्तव्यम्" इस वार्तिकसे ङीष् हुआ है। "बन्धुरं तून्नताऽऽनतम्" इत्यमरः। दृप्तः=दृप् + क्तः। ककुद्मान् = ककुद् (वृषस्कन्धः), अतिशयितः अस्यास्तीति, ककुद् + मतुप्। यहाँपर "ककुद्मत्" शब्दके "झयः" इस सूत्रसे 'म' के स्थानमें "व" की प्राप्ति,थी परन्तु यवादिगणमें पाठ होनेसे नहीं हुई। बध्नाति= क्र्यादिस्थ "वन्ध बन्धने" धातुसे लट्, इन्द्रवज्रा वृत्त है ॥ ४७ ॥

एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी।
मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥ ४८ ॥

अन्वयः—(हे सीते !) प्रसन्नस्तिमितप्रवाहा विदूराऽन्तरभावतन्वी एषा मन्दाकिनी सरित् नगोपकण्ठे भूमेः कण्ठगता मुक्तावली इव भाति ॥ ४८ ॥

व्याख्या—(हे सीते !) प्रसन्नस्तिमितप्रवाहा = निर्मलनिःस्पन्दप्रवाहा, विदूराऽन्तरभावतन्वी = विप्रकृष्टाऽवकाशभावसूक्ष्मा, एषा = इयं, मन्दाकिनी= मन्दाकिनीनामधेया, सरित् = नदी, नगोपकण्ठे = चित्रकूटपर्वतसमीपे, भूमेः = पृथिव्याः, कण्ठगता = गलस्थिता, मुक्ताऽऽवली इव=मौक्तिकमाला इव, भाति= शोभते, अत्र चित्रकूटपर्वतस्य शिरस्त्वं तदुपकण्ठस्य च कण्ठत्वं प्रतीयते ॥४८॥

भावार्थः—हे सीते ! निर्मला निश्चलप्रवाहा च दूरत्वात्सूक्ष्मत्वेन प्रतीयमाना एषा मन्दाकिनी नाम काचिन्नदी चित्रकूटनिकटे भूमेः कण्ठस्थिता मुक्तामालेव शोभते ॥ ४८ ॥

अनुवादः—हे सीते ! निर्मल और स्थिर प्रवाहवाली दूरताके कारण

पतली-सी दिखाई देनेवाली मन्दाकिनी नदी, चित्रकूट पर्वतके समीपमें कण्ठ स्थित मोतियोंकी मालाके समान शोभित हो रही है ॥ ४८ ॥

टिप्पणी—प्रसन्नस्तिमितप्रवाहा—प्र + सद् = क्तः = प्रसन्नः । प्रसन्नः स्तिमितः प्रवाहो यस्याः सा (बहु०) । विदूराऽन्तरभावतन्वी = विदूरं च तत् अन्तरम् (क० धा०) । विदूराऽन्तरस्य भावः (ष० त०) । तस्मात् तन्वी (प० त०) । मन्दाकिनी = यह चित्रकूटकी निकटवर्तिनी कोई नदी है । नगोपकण्ठे—न गच्छतीति नगः, "अन्यत्रापि दृश्यत इति वक्तव्यम्" इस वार्तिकसे नञ्–उपपदपूर्वक गम् धातुसे डप्रत्यय हुआ है "नगोऽप्राणिष्वन्यतरस्याम्" इस सूत्रसे नञ् का प्रकृतिभाव हुआ है । "शैलवृक्षौ नगावगौ" इत्यमरः । नगस्य उपकण्ठः तस्मिन् (ष० त०) । कण्ठगता = कण्ठं गता, यहाँपर "द्वितीया श्रिताऽतीतपतितगताऽत्यस्तप्राप्ताऽऽपन्नैः" इस सूत्रसे द्वितीयातत्पुरुष हुआ है । भाति = भा + लट्–तिप् । इस श्लोकमें उत्प्रेक्षा अलंकार है । उपजाति छन्द है ॥ ४८ ॥

अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ।
यवांकुरापाण्डुकपोलशोभी मयावतंसः परिकल्पितस्ते ॥ ४९ ॥

अन्वयः—(हे सीते !) अनुगिरं सुजातः अयं तमालः । यस्य सुगन्धि प्रवालम् आदाय मया ते यवाऽङ्कुराऽऽपाण्डुकपोलशोभी अवतंसः परिकल्पितः ॥ ४९ ॥

व्याख्या—(हे सीते !) अनुगिरं = चित्रकूटपर्वतसमीपे, सुजातः = सुन्दरः, अयं = निकटवर्ती, तमालः = तापिच्छः दृश्यत इति शेषः । यस्य = तमालस्य, सुगन्धि = मनोहरगन्धयुक्तं, प्रवालं = पल्लवम्, आदाय = गृहीत्वा, मया = रामेण, ते = तव, यवाऽङ्कुराऽऽपाण्डुकपोलशोशी = दीर्घशूकाऽङ्कुरपाण्डुरगण्डशोभी, अवतंसः = कर्णाऽलंकारः, परिकल्पितः = रचितः ॥ ४९ ॥

भावार्थः—हे सीते ! चित्रकूटसमीपे अयं सुन्दरस्तमालवृक्षः । यस्म सौरभयुक्तं प्रवालं मया तव कर्णाऽलंकारत्वेन परिकल्पितम् ॥ ४९ ॥

अनुवादः—हें सीते ! चित्रकूट पर्वतके समीपमें सुन्दर यह तमाल वृक्ष है । जिसके सुगन्धि पल्लवको लेकर मैंने यवाऽङ्कुरके समान तुम्हारे पीले कपोल में शोभित होनेवाला कर्णाऽलङ्कार बनाया था ॥ ४९ ॥

टिप्पणी—अनुगिरं=गिरेः समीपे, यहाँपर समीप अर्थमें "अव्ययं विभक्तिसमीप०" इत्यादिसूत्रसे अव्ययीभाव समास होकर "गिरेश्च सेनकस्य" इस सूत्र से समासाऽन्त टच् प्रत्यय हुआ है, एक पक्ष में "अनुगिरि" ऐसा रूप भी बन जाता है। सुजातः=जननं जातं, जन+क्तः। शोभनं (जन्म) यस्य सः (बहु०)। सुगन्धि=शोभनो गन्धो यस्य, तत् (बहु०), यहाँ पर "गन्धस्येदुत्पूतिसुसुरभिभ्यः" इस सूत्रसे समासाऽन्त इप्रत्यय हुआ है। आदाय=आङ्+दा+क्त्वा (ल्यप्) यवाऽङ्कुराऽऽपाण्डुकपोलशोभी=आ (समन्तात्) पाण्डुः आपाण्डुः (गतिसमासः) आपाण्डुश्चाऽसौ कपोलः (क० धा०) यवाऽङ्कुर इव आपाण्डुकपोलः, यहाँपर "उपमानानि सामान्यवचनैः" इस सूत्रसे कर्मधारय समास हुआ है। आपाण्डुकपोले शोभते तच्छीलः आपाण्डुकपोलशोभी (ताच्छील्ये णिनिः, उपपदसमासः)। कल्पितः—कृपू=क्तः। इस श्लोकमें उपमा अलंकार है। उपेन्द्रवज्रा छन्द है। "उपेन्द्रवज्रा जतजास्ततो गौ" यह इसका लक्षण है ॥ ४९ ॥

अनिग्रहत्रासविनीतसत्त्वमपुष्पलिङ्गात् फलबन्धिवृक्षम्।
वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावम् ॥ ५० ॥

अन्वयः—(हे सीते !) अनिग्रहत्रासविनीतसत्त्वम् अपुष्पलिंगात् फलबन्धिवृक्षम् आविष्कृतोदग्रतरप्रभावम् अत्रेः तपसः साधनम् एतत् वनम् ॥५०॥

व्याख्या—(हे सीते !) अनिग्रहत्रासविनीतसत्त्वं=दण्डभयं विनाऽपि शिक्षितजन्तुयुक्तम्, अपुष्पलिंगात्=पुष्परूपनिमित्तं विनाऽपि, फलबन्धिवृक्षं=सफलवृक्षसहितम् (अतएव) आविष्कृतोदग्रतरप्रभावं=प्रकाशितोन्नततरसामर्थ्यम्, अत्रेः=अत्रिनामकस्य मुनेः, तपसः=तपश्चरणस्य, साधनं=कारणम्, एतत्=इदम्, वनम्=अरण्यम् अस्तीति शेषः ॥ ५० ॥

भावाऽर्थः—हे सीते ! इदमत्रिमुनेः तपसः साधनं वनं 'यत्र दण्डभयं विनापि जन्तवः शिक्षिताः' पुष्परूपनिमित्तं विनाऽपि फलवन्तो वृक्षा वर्तन्ते।

अनुवादः—हे सीते ! दण्डका भय न होनेपर भी विनीत जन्तुओंसे युक्त विना फूलोंके फल लगानेवाले, वृक्षोंसे सम्पन्न अतएव उन्नत प्रभाववाला यह 'अत्रि' मुनिकी तपस्याका साधन-वन है ॥ ५० ॥

टिप्पणी—अनिग्रहत्रासविनीतसत्त्वम्—त्रसनं त्रासः, त्रस+घञ्। निग्रहात् त्रासः (प० त०)। अविद्यमानो निग्रहत्रासो येषां ते अनिग्रहत्रासाः,

यहाँपर "नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः" इस वार्तिकसे नञ्बहुव्रीहिसमास हुआ है। अनिग्रहत्रासाः विनीताः सत्त्वा यस्मिंस्तत् (बहु०)। अपुष्पलिंगात्=पुष्पम् एव लिंगं (रूपक०), न पुष्पलिंगं तस्मात् (नञ्०)। फलवन्धिवृक्षं=फलानि वध्नन्तीति फलबन्धिनः, फल+बन्ध+णिनिः (उपपद०)। फलवन्धिनो वृक्षा यस्मिन् तत् (बहु०)। आविष्कृतोदग्रतरप्रभावम्—अतिशयेन उदग्रः उदग्रतरः, यहांपर 'उदग्र' शब्दसे "द्विवचनविभज्योपपदे तरवीयसुनौ" इस सूत्रसे तरप् प्रत्यय हुआ है। आविः+कृ+क्तः=आविष्कृतः, यहांपर विसर्गके स्थानमें "इदुदुपधस्य चाऽप्रत्ययस्य" इस सूत्रसे मूर्धन्य षकार हुआ है। वाविष्कृतः उदग्रतरः प्रभावो यस्मिंस्तत् (बहु०)। अत्रेः=अत्रि ऋषि सात ऋषियोंमें परिगणित एक ऋषि हैं, जैसे कि—

"कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः।
जमदग्नेर्वशिष्ठश्च (साध्वी चैवाऽप्यरुन्धती)॥"

दूसरे मतके अनुसार भी अत्रि परिगणित हैं, जैसे—

मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः।
वशिष्ठश्च महाभागः सप्त ते ब्रह्मणः सुताः॥"

महर्षि अत्रिकी पत्नी "अनुसूया" पतिव्रताओंमें श्रेष्ठ मानी गई हैं। ब्रह्मा, विष्णु और महेश्वर अनुसूयाके गर्भसे कलारूपसे अवतीर्ण होकर चन्द्र, दत्तात्रेय और दुर्वासाके रूपमें उत्पन्न हुए हैं, ऐसा पौराणिक उपाख्यान मिलता है। दश साल तक अनावृष्टि होनेपर उन्होंने फल-मूलको उत्पन्न किया और स्नान आदि की सहूलियतके लिए अनुसूयाने अपने आश्रमके निकट प्रदेशसे गङ्गाको प्रवाहित किया था ऐसा रामायण में वर्णन है। कहींपर चन्द्रमाको अत्रिमुनिके नेत्रसे उत्पन्न भी बतलाया है। याज्ञवल्क्यस्मृतिके निम्नस्थ श्लोक में धर्मशास्त्रके रचयिताओंमें अत्रिका भी उल्लेख किया हैं।

"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमाऽऽपस्तम्बसंवर्ताः कात्यायनबृहस्पती॥
शातातपो वशिष्ठश्च धर्मशास्त्रप्रयोजकाः॥ आचाराध्यायः।

रामचन्द्रजी वनवासके समय सीता और लक्ष्मणके साथ अत्रि मुनिके आश्रममें कुछ समयतक ठहरे थे। इनका धर्मशास्त्र उपलब्ध भी है। साथं=

साध+ल्युट्। इस श्लोकमें दण्डमयरूप कारणके न रहनेपर भी जन्तुओंका विनीतस्वरूप कार्यके रहनेसे एवम् पुष्परूप कारणके बिना भी फलरूप कार्यकी उत्पत्ति होनेसे विभावना अलंकार है, इसका सोदाहरण लक्षण चन्द्रालोकमें लिखा है—

"विभावना विनाऽपि स्यात्कारणं कार्यजन्म चेत्।
पश्य लाक्षारसाऽसिक्तं रक्तं तच्चरणद्वयम्॥ ५-७७॥

अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम्।
प्रवर्तयामास किलानुसूया त्रिस्रोतसं त्र्यम्बकमौलिमालाम्॥५१॥

अन्वयः—(हे सीते!) अत्र अनुसूया सप्तर्षिहस्तोद्धृतहेमपद्मां त्र्यम्बकमौलिमालां त्रिस्रोतसं तपोधनानाम् अभिषेकाय प्रवर्तयामास किल॥ ५१॥

व्याख्या—(हे सीते!) अत्र=अस्मिन् वन इत्यर्थः। सनुसूया=अत्रिपत्नी, सप्तर्षिहस्तोद्धृतहेमपद्मां=सप्तर्षिकरनिष्कासितसुवर्णकमलां, त्र्यम्बकमौलिमालां=शिवशिरःस्रजं, त्रिस्रोतसं=गङ्गां, तपोधनानां=तपस्विनाम्, अभिषेकाय=स्नानाय, प्रवर्तयामास=प्रवाहयामास। किल॥ ५१॥

भावाऽर्थः—हे सीते! अस्मिन्वने अनुसूया स्वर्णकमलप्रसूतिं शिवजटाजूटस्थितां भागीरथीं तपस्विनां स्नानाय प्रवाहयामास किल॥ ५१॥

अनुवादः—हे सीते! इस वनमें अनुसूयाने सप्तर्षियोंके हाथोंसे तोड़े गये सुवर्णकमलोंसे सम्पन्न और शिवजीके शिरकी मालाके समान गङ्गाजीको तपस्वियोंके स्नानके लिए प्रवाहित कराया॥ ५१॥

टिप्पणी—सप्तर्षिहस्तोद्धृतहेमपद्मां=सप्त च ते ऋषयः सप्तर्षयः, यहाँपर "दिक्संख्ये संज्ञायाम्" इस सूत्रसे समास हुआ है। सप्तर्षियोंका वर्णन पचासवें श्लोकमें किया गया है। सप्तर्षीणां हस्ताः (ष० त०), तैः उद्धृतानि (तृ० त०), हेम्नः पद्मानि (ष० त०), सप्तर्षिहस्तोद्धृतानि हेमपद्मानि यस्याः, ताम् (बहु०)। त्र्यम्बकमौलिमालां=त्रीणि अम्बकानि (नेत्राणि) यस्य स त्र्यम्बकः (बहु०), त्र्यम्बकस्य मौलिः (ष० त०), तस्य माला, ताम् (ष० त०)। त्रिस्रोतसं=त्रीणि स्रोतांसि यस्याः सा त्रिस्रोताः, ताम् (बहु०)। तपोधनानां=तप एव धनं येषां ते तपोधनाः, तेषाम् (बहु०)। अभिषेकाय=अभिषेचनम्; अभिषेकः, तस्मै, अभि+सिच्+घञ् (भावे), "उपसर्गात् सुनोति०" इत्यादि सूत्रसे

षत्व हुआ है। "तादर्थ्ये चतुर्थी वाच्या" इस वार्तिकसे चतुर्थी हुई है। प्रवर्तयामास=प्र+वृतु+णिच्+लिट्+तिप्। किल=यह ऐतिह्य अर्थका द्योतक अव्यय है। उपजाति छन्द है ।। ५१ ।।

वीरासनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः।
निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि ।।

अन्वयः—(हे सीते !) वीराऽऽसनैः ध्यानजुषाम् ऋषीणां समध्यासितवेदिमध्याः अमी शाखिनः अपि निवातनिष्कम्पतया लोगाऽधिरूढा इव विभान्ति ।।

व्याख्या—(हे सीते !) वीराऽऽसनैः=जयसाधनैः आसनविशेषैः, ध्यानजुषां=ध्यानवताम्, ऋषीणां=सत्यवचसां, समध्यासितवेदिमध्याः=समधिरूढवेदिमध्यभागाः, अमी=एते, शाखिनः अपि=वृक्षा अपि, निवातनिष्कम्पतया=वातरहितप्रदेशे कम्परहितत्वेन, योगाधिरूढा इव,=ध्यानभाज इव, विभान्ति शोभन्ते, निश्चलाऽङ्गा भवन्तीति भावः ।। ५२ ।।

भावाऽर्थः—हे सीते ! वीरासनैर्ध्यायिनामृषीणां वेदिमध्यस्थिता अमी वृक्षा अपि निवाते निष्कम्पतया ध्यानभाज इव शोभन्ते ।। ५२ ।।

अनुवादः—हे सीते ! वीरासनसे ध्यान करनेवाले ऋषियोंके वेदिमध्यमें स्थित ये वृक्ष भी वायुरहित प्रदेशमें कम्पनरहित होनेसे योगाऽभ्यास करते हुए की तरह हो रहे हैं ।। ५२ ।।

टिप्पणी—वीराऽऽसनैः=वीरस्य आसनानि, तैः (ष० त०) राजयोगके आठ अंगोंमें आसन भी एक अंग है। पद्मासन, वीरासन आदि ८४ आसन योगशास्त्रमें प्रसिद्ध हैं। वीरासनका लक्षण वसिष्ठने लिखा है—

"एकपादमथैकस्मिन् विन्यस्योरुणि संस्थितम्।
इतरस्मिंस्तथा चाऽन्यं वीराऽऽसनमुदाहृतम् ।।"

अर्थात् एक पैरको एक ऊरुमें और दूसरे पैरको दूसरे ऊरुमें रखकर बैठनेको "वीराऽऽसन कहते हैं।

वीरासनको "पर्यङ्कवन्ध" भी कहते हैं। हेमाद्रिने गरुडपुराणका हवाला देकर इसका लक्षण दिया है—

---

१. "म्पी"ति पाठान्तरम्।

"उत्थितस्तु दिवा तिष्ठेदुपविष्टस्तथा निशि ।
एतद्वीरासनं प्रोक्तं महापातकनाशनम् ।।"

अर्थात् दिनभर खड़े रहना और रात को बैठे रहना इसको "वीरासन" कहते हैं । इसको करनेसे महापातकका नाश होता है ।

ध्यानजुषां=ध्यानं जुषन्त इति ध्यानजुषः, तेषाम्, ध्यान-उपपदपूर्वक "षजी प्रतिसेवनयोः" धातुसे क्विप् प्रत्यय होकर "ध्यानजुष्" पद बनता है । (उपपदसमासः) ।

ऋषीणाम्=ऋषन्ति (जानन्ति, वेदमन्त्रं पश्यन्ति) इति ऋषयः तेषाम् । "ऋषी गतौ" धातुसे "इगुपधात्कित्" इस औणादिक सूत्रसे इन् प्रत्यय हुआ है । वेदमन्त्रद्रष्टाको "ऋषि" कहते हैं । यहाँपर इसका मुनिके अर्थमें प्रयोग हुआ है । "ऋषयः सत्यवचसः" इत्यमरः । समध्यासितवेदिमध्याः=वेदेः मध्यम् (ष० त०) समध्यासितं वेदिमध्यं यैस्ते (बहु०) । शाखिनः=शाखाः सन्ति येषां ते, यहाँपर 'शाखा' शब्दसे "व्रीह्यादिभ्यश्च" इस सूत्रसे इनि प्रत्यय हुआ है । निवातनिष्कम्पतया=निर्गतो वातो यस्मात्तत् निवातम् (वातरहितस्थानम्), बहुव्रीहिः, निर्गतः कम्पो येभ्यस्ते निष्कम्पाः (बहु०), निष्कम्पाणां भावो निष्कम्पता, (निष्कम्प+तल्+टाप्) निवाते निष्कम्पता, तया (स० त०) । योगाऽधिरूढाः=योगम् अधिरूढाः (द्वि० त०) । "योगश्चित्तवृत्तिनिरोधः" इस पातञ्जलयोगदर्शनके सूत्रके अनुसार चितवृत्तिके निरोधको 'योग' कहते हैं । इस श्लोकमें उत्प्रेक्षा अलङ्कार और उपजाति छन्द है ।। ५२ ।।

त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ।।५३।।

अन्वयः—(हे सीते !) त्वया पुरस्ताद् य उपयाचितः श्याम इति प्रतीतः सः अयं वटः, फलितः (सन्) सपद्मरागो गारुडानां मणीनां राशिः इव विभाति ।। ५३ ।।

व्याख्या—(हे सीते !) त्वया=भवत्या, पुरस्तात्=पूर्वं, यः–वटः, उपयाचितः=प्रार्थितः, श्याम इति=श्यामनामकः, प्रतीतः=प्रख्यातः, सः अयं वटः=न्यग्रोधः, फलितः=संजातफलः सन्, सपद्मरागः=पद्मरागसहितः गारुडानां=मरकतानां, मणीनां=रत्नानां, राशिः इव=समूह इव, विभाति=शोभाते ।। ५३ ।।

भावार्थः—हे सीते ! त्वया पूर्वं प्रार्थितः श्यामनामको वटः साम्प्रतं फलितः सन् पद्मरागसहितो मरकतराशिरिव शोभते ॥ ५३ ॥

अनुवादः—हे सीते ! तुमने पहले जिसकी प्रार्थना की थी "श्याम" नामसे प्रसिद्ध वह वरगद इस समय फलवाला होता हुआ पद्मपरागमणियोंसे युक्त पन्ना मणियोंके समूहके समान शोभित हो रहा है ॥ ५३ ॥

टिप्पणी—उपयाचितः = उप + याच् + क्तः । प्रतीतः = प्रति + इण् + क्तः । "प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः" । इत्यमरः । सीताजीने वटसे जो प्रार्थना की थी वह रामायणमें इस प्रकारसे है—

"न्यग्रोधं तमुपस्थाय वैदेही वाक्यमब्रवीत् ।
नमस्तेऽस्तु महावृक्ष ! पालयेन्मे व्रतं पतिः ॥"

अर्थात् सीताजीने उस वड़के पास जाकर "हे महावृक्ष ! तुम्हें नमस्कार है, मेरे पतिव्रतका पालन करें" ऐसा वाक्य कहा । फलितः = फलानि संजातानि अस्य सः, यहाँपर फल शब्दसे "तदस्य संजातं तारकादिभ्य इतच्" इस वार्तिक से इतच् प्रत्यय हुआ है । सपद्मरागः = पद्मरागैः सहितः (तुल्ययोग०) । गारुडानां = गरुडस्य इमे गारुडाः, तेषाम् "तस्येदम्" इससे अञ् प्रत्यय हुआ है । "गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः" इत्यमरः ।

इस श्लोकमें उत्प्रेक्षा अलङ्कार है । उपजाति छन्द है ॥ ५३ ॥

अथाऽतः श्लोकचतुष्टयेन प्रयागे गङ्गायमुनासङ्गमं वर्णयति—

क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव[1] ॥५४॥
क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।
अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥५५॥
क्वचित्प्रभा चान्द्रमसी तमोभिश्छाया विलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभः प्रदेशा ॥५६॥
क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि ! विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ॥५७॥

अन्वयः—हे अनवद्याऽङ्गि ! क्वचित् प्रभालेपिभिः इन्द्रनीलैः अनुविद्धा मुक्तामयी यष्टिः इव, अन्यत्र इन्दीवरैः उत्खचिताऽन्तरा सितपङ्कजानां माला

---

१. "रुद्ग्रथिताऽन्तरेव" इति पाठान्तरम् ।

इव क्वचित् कादम्बसंसर्गवती प्रियमानसानां खगानां पंक्तिः, इव, अन्यत्र कालाऽगुरु दत्तपत्रा भुवः चन्दनकल्पिता भक्तिः इव, क्वचित् छायाविलीनैः तमोभिः शवलीकृता चान्द्रमसी प्रभा इव अन्यत्र रन्ध्रेषु आलक्ष्यनभः प्रदेशा शुभ्रा शरदभ्रलेखा इव, क्वचित् कृष्णोरगभूषणा भस्माऽङ्गरागा ईश्वरस्य तनुः इव यमुनातरङ्गैः भिन्नप्रवाहा गङ्गा विभाति। पश्य ॥ ५४–५७ ॥

व्याख्या—हे अनवद्याऽङ्गि=हे अनिन्दिताऽवयवे ! सीते, क्वचित्=कुत्रचित्, प्रभालेपिभिः=कान्तिलेपिभिः, इन्द्रनीलैः=मरकतैः, अनुविद्धा=सहगुम्फिता, मुक्तामयी=मौक्तिकमयी, यष्टिः इव=पंक्तिः इव, हाराऽऽवलिरिवेति भावः। यमुनातरङ्गैः भिन्नप्रवाहा गङ्गा विभाति, पश्येत्यत्र सम्बन्धः, एवं परत्राऽपि। अन्यत्र=अन्यस्मिन्प्रदेशे, इन्दीवरैः=नीलोत्पलैः, उत्खचिताऽन्तरा=उद्गुम्फितमध्यभागा, सितपङ्कजानां=श्वेतकमलानां, माला इव=स्रक् इव, क्वचित्=कुत्रचित्, कादम्बसंसर्गवती=नीलहंससंसृष्टा, प्रियमानसानाम्=अभीष्टमानससरोवराणां, खगानां=पक्षिणां राजहंसानामिति भावः। पंक्तिः इव=आवलिः इव, अन्यत्र=अन्यस्मिन् स्थाने, कालाऽगुरुदत्तपत्रा=कृष्णागुरुरचितमकरिकापत्रा, भुवः=पृथिव्याः, चन्दनकल्पिता=श्रीखण्डलेपनिर्मिता, भक्तिः इव=रेखा इव, क्वचित्=कुत्रचित्, छायाविलीनैः=अनातपस्थितैः, तमोभिः=अन्धकारैः, शवलीकृता=चित्रीकृता, चान्द्रमसी=चान्द्री, प्रभा इव=कान्तिः इव, चन्द्रिकेवेति भावः। अन्यत्र=अन्यस्मिन् स्थाने, रन्ध्रेषु=छिद्रेषु, आलक्ष्यनभःप्रदेशा=ईषद्दृश्यव्योमप्रदेशा, शुभ्रा=शुक्ला, शरदभ्रलेखा इव=शरन्मेघपङ्क्तिः इव, क्वचिद्=कुत्रचित्, कृष्णोरगभूषणा=कालसर्पालङ्कारा, भस्माऽङ्गरागा=भसिताऽवयवरागा, ईश्वरस्य=महेश्वरस्य, तनुः इव=शरीरम् इव, यमुनातरंगैः=कालिन्दीवीचिभिः, भिन्नप्रवाहा=व्यामिश्रौघा, गंगा=जाह्नवी, विभाति=शोभते, पश्य=विलोकय ॥ ५४–५७ ॥

भावाऽर्थः—हे सीते ! क्वचिन्मरकतैः सहगुम्फिता हारावलिरिव अन्यत्र नीलोत्पलैरुद्गुम्फितमध्यभागा पुण्डरीकपंक्तिरिव, कुत्रचित् कलहंससंसृष्टा राजहंसश्रेणीव, अन्यत्र कृष्णाऽगुरुरचितमकरिकापत्रा चन्दनकल्पिता भूरेखेव, कुत्रचित् छायास्थितैरन्धकारैश्चित्रीकृता चान्द्री प्रभेव, अन्यत्र, छिद्रेषु ईषल्लक्ष्यव्योमप्रदेशा शुक्ला शरन्मेघरेखेव कुत्रचित् कालसर्पाऽलंकारा भस्मलिप्ता शंकरतनुरिव यमुनातरंगैः मिश्रितप्रवाहा गंगा शोभते, पश्य ॥ ५४–५७ ॥

अनुवादः—हे अनिन्दित अवयवोंसे युक्त सीते ! कहीं कान्तिसे लेप करने वाली इन्द्रनील मणियोंसे जड़ी हुई मुक्तावलीके सदृश, दूसरी ओर नीलकमलों से मध्यभागमें गुम्फित श्वेत कमलोंकी मालाके समान, कहींपर नीलहंसोंसे युक्त राजहंसोंकी पंक्तिके तुल्य, दूसरी ओर कृष्ण अगुरुसे रचित मकरिकाके पत्रसे युक्त चन्दनसे बनाई गई पृथिवीकी रेखाके सदृश, कहींपर छायामें स्थित अन्धकारोंसे चितकबरी चन्द्रकान्तिके समान, दूसरी और छिद्रोंमें कुछ देखे जानेवाले आकाश-प्रदेशसे युक्त सफेद शरद् ऋतुकी मेघरेखा सदृश और कहीं-पर कृष्णसर्परूप अलंकारसे युक्त अंगोमें भस्मरागसे लिप्त शिवजीकी तनु (शरीर) की नाईं यमुनाकी तरंगोंसे मिश्रित प्रवाहवाली गंगाजी शोभित हो रही हैं, देखो ! ॥ ५४–५७ ॥

टिप्पणी—हे अनवद्याऽङ्गि=न अवद्यानि अनवद्यानि (नञ्०), अनवद्यानि अंगानि यस्याः सा अनवद्यांगी, तत्सम्बुद्धौ, (बहु०) यहाँपर स्त्रीत्वविवक्षामें "अंगगात्रकण्ठेभ्यो वक्तव्यम्" इस वार्तिकसे ङीष् प्रत्यय हुआ है। प्रभालेपिभिः=प्रभया लिम्पन्ति (सन्निहितम्) इति प्रभालेपिनः तैः (प्रभा=लिप्=णिनिः, उपपदसमासः) इन्द्रनीलैः=रत्नविशेषको "इन्द्रनील" कहते हैं. इसे हिन्दीमें "नीलम" "पन्ना" भी कहते हैं। अनुविद्धा=अनु + व्यध + क्त + टाप्। मुक्तामयी=प्रचुरा मुक्ताः सन्ति यस्यां सा, मुक्ता शब्दसे "तत्प्रकृतवचने मयट्" इस सूत्रसे मयट् प्रत्यय होकर टित् होनेसे स्त्रीत्वविवक्षामें "टिड्ढाञ्०" इत्यादि सूत्रसे ङीप् प्रत्यय हुआ है। अन्यत्र=अन्यस्मिन् इति, अन्य शब्दसे "सप्तम्यास्त्रल्" इस सूत्रसे त्रल् प्रत्यय हुआ है। यह अव्यय है। उत्खचिताऽन्तरा=उत्खचितम् अन्तरं यस्याः सा (बहु०)। सितपंकजानां=पंके जातानि पंकजानि, पंक–उपपदपूर्वक "जनी प्रादुर्भावे" धातुसे "सप्तम्यां जनेर्डः" इस सूत्रसे डप्रत्यय हुआ है। सितानि च तानि पंकजानि सितपंकजानि, तेषाम् (क० धा०)। कादम्बसंसर्गवती=कादम्बानां संसर्गः (ष० त०) "कादम्बः कलहंसः स्यात्" इत्यमरः। कादम्बसंसर्गः अस्या अस्तीति, कादम्बसंसर्ग शब्दसे "तदस्याऽस्त्यस्मिन्निति मतुप्" इस सूत्रसे मतुप् प्रत्यय होकर "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" इससे 'म' के स्थानमें 'व' होकर स्त्रीत्वविवक्षामें 'उगितश्च' इस सूत्रसे ङीप् प्रत्यय हुआ है। प्रियमानसानां–मनसा निर्वृत्तं मानसं

"मानस्" शब्दसे "तेन निर्वृत्तम्" इस सूत्रसे अण् प्रत्यय हुआ है। कैलास पर्वतमें ब्रह्माजीके मनसे रचित एक सरोवर का नाम "मानस सरोवर" है जैसा कि रामायणमें लिखा गया है—

"कैलासशिखरे राम ! मनसा निर्मितं सरः ।
ब्रह्मणा प्रागिदं यस्मात्तदभून्मानसं सरः ॥"

प्रियं मानसं येषां ते प्रियमानसाः, तेषाम् (बहु०)। खगानां=खे गच्छन्तीति खगाः, तेषाम्, ख+गम्+डः (उपपदसमासः)। "खग" कहते हैं पक्षीको, यहाँपर "प्रियमानसानाम्" विशेषण देनेसे राजहंसोंका बोध होता है। राजहंसोंको मानससरोवर प्रिय है ऐसी जनश्रुति है। वर्षाऋतुमें राजहंस मानसरोवरमें जाते हैं ऐसी भी जनश्रुति है। "जलधरसमये मानसं यान्ति हंसाः" (साहित्यदर्पणः)। "राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः।" इत्यमरः। कालाऽगुरुदत्तपत्रा=कालं च तत् अगुरु (क० धा०)। दत्तानि पत्राणि यस्याः सा (बहु०)। कालागुरुणा दत्तपत्रा (तृ० त०)। छायाविलीनैः= छायासु विलीनानि, तैः (स० त०)। शबलीकृता=अशबला शबला यथा सम्पद्यते तथा कृता (शबला+च्वि+कृ+क्त+टाप्)। चान्द्रमसी=चन्द्रमस इयम्, चन्द्रमस्+अण् ङीप्। आलक्ष्यनभःप्रदेशाः=ईषत् लक्ष्य आलक्ष्यः (गतिसमासः) नभसः प्रदेशः (ष० त०)। आलक्ष्यो नभःप्रदेशो यस्यां सा (बहु०)। शरदभ्रलेखा=शरदि अभ्राणि (स० त०) तेषां लेखा (ष० त०)। कृष्णोरगभूषणा= कृष्णाश्च ते उरगाः (क० धा०); ते भूषणानि यस्यां सा (बहु०)। भस्माऽङ्गरागा—अङ्गानां रागः (ष० त०), भस्म एव अङ्गरागो यस्याः सा (बहु०)। ईश्वरस्य=ईष्टे असौ ईश्वरः, तस्य, यहाँपर "ईश ऐश्वर्ये" इस धातुमें "स्थेशभासपिसकसो वरच्" इस सूत्रसे वरच् प्रत्यय हुआ है। "ईश्वरः शर्व ईशानः" इत्यमरः। यमुनातरंगैः=यमुनायास्तरङ्गाः, तैः (ष० त०)। भिन्नप्रवाहा=भिन्नः प्रवाहो यस्याः सा (बहु०)। पश्य=दृश्+लोट्+सिप्, इसका कर्म वाक्याऽर्थ है।

यहाँपर चौवनवें श्लोकसे सत्तावनवें श्लोक तक कुल चार श्लोकोंका परस्पर सम्बन्ध होनेसे इनको "कलापक कहते हैं। जैसा कि साहित्यदर्पणमें हैं—

"छन्दोबद्धपदं पद्यं, तेनैकेन च मुक्तकम् ।
द्वाभ्यां तु युग्मकं सन्दानितकं त्रिभिरिष्यते ॥
कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ।"

अर्थात् एक श्लोकको "मुक्तक", सम्बद्ध दो श्लोकोंको "युग्मक", तीन श्लोकोंको "सन्दानितक" किसीके मतमें "विशेषक", चार श्लोकोंको "कलापक" और चार श्लोकोंसे अधिकको "कुलक" कहते हैं।

यहाँपर "यमुनातरंगैः भिन्नप्रवाहा गंगा" अर्थात् "यमुना-तरंगोंसे मिश्रित प्रवाहवाली गंगा" के बहुतसे उपमान होनेसे "मालोपमा" अलङ्कार है, साहित्यदर्पणमें उसका लक्षण है—

मालोपमा यदेकस्योपमानं बहु दृश्यते।" इति।

चारों श्लोकोंमें उपजाति है छन्द॥ ५४–५७॥

समुद्रपत्न्योर्जलसन्निपाते पूतात्मनामत्र किलाभिषेकात्।
तत्त्वावबोधेन विनाऽपि [1]भूयस्तनुत्यजां नास्ति शरीरबन्धः॥५८॥

अन्वयः—अत्र समुपत्न्योः जलसन्निपाते अभिषेकात् पूतात्मनां तत्त्वाऽवबोधेन विना अपि तनुत्यजां भूयः शरीरबन्धो न अस्ति किल॥ ५८॥

व्याख्या—(हे सीते !) अत्र=अस्मिन् स्थाने, प्रयाग इत्यर्थः। समुद्रपत्न्योः=सागरभार्ययोः, गंगायमुनयोरित्यर्थः। जलसन्निपाते=संगमे, अभिषेकात्=स्नानात् हेतोः, पूताऽऽत्मनां=पवित्राऽन्तःकरणानां जनानां, तत्त्वाऽवबोधेन विना अपि=तत्त्वज्ञानेन विना अपि, तनुत्यजाम्=शरीरत्यागिनाम्, प्रारब्धकर्मसमाप्त्यनन्तरमिति शेषः। भूयः=पुनः, शरीरबन्धः=देहसम्बन्धः, न अस्ति=नो वर्तते, मोक्षलाभादिति भावः, किल=निश्चयेन। अन्यत्र ज्ञानादेव मोक्षः। अत्र तु स्नानादपि मुक्तिरिति भावः॥ ५८॥

भावार्थः—हे सीते ! प्रयागे गंगायमुनयोः संगमे स्नानात् पवित्राणां जनानां विनाऽपि तत्त्वज्ञानं प्रारब्धशरीरत्यागानन्तरं पुनः शरीरसम्बन्धो नास्ति (मुक्तिर्भवति)॥ ५८॥

अनुवादः—हे सीते ! यहाँ गंगा और यमुनाके संगम में स्नान करनेसे पवित्र अन्तःकरणवाले जनोंको ज्ञानके बिना भी प्रारब्ध शरीर छोड़नेके अनन्तर फिर शरीरसम्बन्ध नहीं होता है अर्थात् वे स्नानसे ही मोक्ष पाते हैं॥

---

१. "शरीरिणाम्" इति पाठान्तरम्।

टिप्पणी—अत्र = इदम् + त्रल् । समुद्रपत्न्योः = पत्युर्यज्ञे संयोगो यया पत्नी, 'पति' शब्दसे 'पत्युर्नो यज्ञसंयोगे" इस सूत्रसे "न" आदेश और ङीप् प्रत्यय हुआ है। समुद्रस्य पत्न्यौ, तयोः (ष० त०)। पुराणों में समुद्रको पति और नदियोंको पत्नी कहा गया है, इस प्रकार यहाँपर "समुद्रपत्नी" कहनेसे गङ्गा और यमुना ली गई हैं। जलसन्निपाते-सन्निपतन्ति अस्मिन् सन्निपाता, सं + नि + पत् + घञ् (अधिकरणे)। जलस्य सन्निपातः, तस्मिन् (ष० त०) अभिषेकात्=अभि + सिच् + घञ् (हेतौ पञ्चमी)। पूताऽऽत्मनां= पूत आत्मा येषां ते पूतात्मानः, तेषाम् (बहु०)। तत्त्वाऽवबोधेन = अवबोधनम् अवबोधः, अव + बुध् + घञ् (भावे) तत्त्वस्य अवबोधः, तेन (ष० त०) 'विना' पदके योगमें "पृथग्विनानानाभिस्तृतीयाऽन्यन्तरस्याम्" इस सूत्रसे तृतीया हुई है, एक पक्षमें पञ्चमी और द्वितीया भी होती है। तनुत्यजां = तनुं त्यजन्तीति तनुत्यजः, तेषाम्, तनु + त्यज् क्विप्। शरीरबन्धः = शरीरस्य बन्धः (ष० त०)। अस्ति = अस् + लट् + तिप्। अन्यत्र ज्ञानसे ही मुक्ति है, परन्तु प्रयागके गंगा और यमुनाके संगममें स्नानसे अन्तःकरणकी शुद्धि होती है और मरणसे भी मुक्ति होती है। उपजाति छन्द है ॥ ५८ ॥

पुरं निषादाधिपतेरिदं तद्यस्मिन्मया [1]मौलिमणिं विहाय।
जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि ! कामाः फलितास्तवेति ॥५९॥

अन्वयः—(हे सीते !) निषादाऽधिपतेः तत् पुरम् इदम्। यस्मिन् मया मौलिमणिं विहाय जटासुबद्धासु सुमन्त्रः "हे कैकेयि ! तव कामाः फलिताः" इति अरुदत् ॥ ५९ ॥

व्याख्या—(हे सीते !) निषादाऽधिपतेः = निषादराजस्य, गुहस्येत्यर्थः। तत्, पुरं = नगरम्, इदं = निकटस्थम्, अस्तीति शेषः। यस्मिन् = पुरे, मया, मौलिमणिं = मुकुटरत्नं, विहाय = त्यक्त्वा, जटासु=सटासु, बद्धासु = रचितासु सतीषु, सुमन्त्रः = सचिवः, हे कैकेयि = हे केकयराजकुमारि, तव = भवत्याः, कामाः = मनोरथाः, फलिताः=सफला जाताः, इति=एवम् उक्त्वा, अरुदत् = अश्रूणि व्यमुचत् ॥ ५९ ॥

भावार्थः–हे सीते ! निषादराजस्य गुहस्य तन्नगरमिदम्। यस्मिन् मया

---

१. "मौलिमणीन्" इति पाठान्तरम्।

मुकुटरत्नं विहाय यदा जटा रचितास्तदा सुमन्त्रः "हे कैकेयि ! रामनिर्वासनात्मकस्तव मनोरथः सफलो जात" इति कथयित्वाऽरोदीत् ।। ५६ ।।

अनुवादः—हे सीते ! निषादराज गुहका यह वह नगर (शृंगबेरपुर) है, जहाँपर मुकुटरत्नको छोड़कर मेरे जटाके बाँधनेपर "हे कैकेयि ! तुम्हारे अभिलाष सफल हुए" ऐसा कहकर सुमन्त्र रोये थे ।। ३६ ।।

टिप्पणी—निषादाऽधिपतेः=निषीदति पापम् एषु इति निषादाः, नि—उपसर्गपूर्वक "षद्लृ विशरणगत्यवसादनेषु" इस धातुसे "हलश्च" इस सूत्रसे अधिकरणमें घञ् प्रत्यय हुआ है। "निषाद" धीवरका ही भेद है। अधिकः पतिः अधिपतिः (गतिसमासः) । निषादानाम् अधिपतिः निषादाऽधिपतिः, तस्य (ष० त०) "पतिः समास एव" इससे घिसंज्ञा होनेसे ऐसा रूप हुआ है। निषादराज गुह थे जो कि भगवान् रामचन्द्रके मित्र थे। उनके नगरका नाम "शृंगबेरपुर" था। मौलिमणिं=मौलेः मणिः, तम् (ष० त०) । विहाय=वि+हा+क्त्वा (ल्यप्), जटासु="व्रतिनस्तु जटा सटा" इत्यमरः । वद्धासु=बन्ध+क्त+टाप् । जटासु वद्धासु="यस्य च भावेन भावलक्षणम्" इससे भावे सप्तमी हुई है। सुमन्त्रः=सुमन्त्र सूत (सारथि) थे, महाराज दशरथके ये मन्त्री भी कहे गये हैं। "ब्राह्मण्यां क्षत्रियात्सूतः" इस प्रमाणके अनुसार ब्राह्मणीमें क्षत्रिय से उत्पन्न व्यक्तिको "सूत" कहते हैं' यह प्रतिलोम जाति है। कैकेयि=केकयस्य अपत्यं स्त्री कैकेयी, तत्सम्बुद्धौ, यहाँपर "केकय" शब्द से "जनपदशब्दात्क्षत्रियादञ्" इससे अञ् प्रत्यय होकर "केकयमित्रयुप्रलयानां यादेरियः" इस सूत्रसे 'य' के स्थान में "इय" हुआ है, केक+इय्+अ गुण और वृद्धि होकर कैकेय होकर स्त्रीत्वविवक्षामें "टिड्ढाणञ्०" इत्यादि सूत्रसे ङीप् होकर "कैकेयी" पद वनता है। सिन्धुदेशके निकटवर्ती देशको "केकय" कहते हैं। केकय देशकी राजकुमारी होनेसे भरतकी माताको "कैकेयी" कहते हैं। फलिताः=फल+इतच् । अरुदत्= "रुदिर् अश्रुविमोचने" धातुसे लुङ् हुआ है। "इर्" की इत्संज्ञा होनेसे "इरितो वा" इससे वैकल्पिक अङ् हुआ है, अङ्के अभावमें "अरोदीत्" ऐसा भी रूप वनता है। उपजाति छन्द है ।। ५६ ।।

पयोधरैः पुण्यजनाङ्गनानां निर्विष्टहेमाम्बुजरेणु यस्याः ।
ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ।। ६० ।।

अन्वयः-(हे सीते !) पुण्यजनाऽङ्गनानां पयोधरैः निर्विष्टहेमाऽम्बुजरेणु ब्राह्मं सरो यस्याः बुद्धेः अव्यक्तम् इव कारणम् आप्तवाचः उदाहरन्ति ॥६०॥

व्याख्या—(हे सीते !) पुण्यजनाऽङ्गनानां=यक्षसुन्दरीणां, पयोधरैः=स्तनैः, निर्विष्टहेमाऽम्बुजरेणु=उपभुक्तस्वर्णकमलपरागं, ब्राह्मं=ब्रह्मसम्बन्धि, सरः=कासारं, मानससरोवरमित्यर्थः। यस्याः=सरय्वाः, बुद्धेः=महत्तत्त्वस्य, अव्यक्तम् इव=प्रकृतिम् इव, कारणं=हेतुम्, आप्तवाचः=वेदाः, मुनयो वा, उदाहरन्ति=कथयन्ति ॥ ६० ॥

भावार्थः—हे सीते ! यत्र यक्षसुन्दर्यः क्रीडयन्ति, यत्र च सुवर्णकमलान्युद्भवन्ति तादृशं मानससरोवरं यस्याः सरय्वाः बुद्धेः प्रकृतिमिव कारणमिति वेदा मुनयो वा प्रतिपादयन्ति ॥ ६० ॥

अनुवादः—हे सीते ! यक्ष सुन्दरियाँ जिसके सुवर्णकमलोंके परागको पयोधरोंमें लेपन करती हैं ऐसे मानस सरोवरको जिस सरयू नदीका, जैसे बुद्धिका कारण अव्यक्त (प्रकृति) है वैसे ही कारण कह कर वेद वा मुनिलोग प्रतिपादन करते हैं ॥ ६० ॥

टिप्पणी—पुण्यजनाऽङ्गनानां=पुण्याश्च ते जनाः पुण्यजनाः (क० धा०), "पुण्यजन" पदसे यहाँपर अलकाके निवासी कुबेरके प्रजाजन "यक्ष" लिए गये हैं, राक्षस नहीं। "भवेत्पुण्यजनो यक्षे राक्षसे सज्जनेऽपि च" इति विश्वः। पुण्यजनानाम् अंगनाः तासाम् (ष० त०)। पयोधरैः=धरन्ति ते धरा, धृञ् +अच् (पचाद्यच्) पयसां धराः, तैः (ष० त०)। निर्विष्टहेमाम्बुजरेणु=हेम्नः अम्बुजानि हेमाम्बुजानि (ष० त०), हेमाम्बुजानां रेणुः (ष० त०), निर्विष्टो हेमाऽम्बुजरेणुः यस्य, तत् (बहु०)। "निर्वेश उपभोगः स्यात्" इत्यमरः। ब्राह्मं=ब्राह्मण इदं, तत्, यहाँपर "ब्रह्मन्" शब्दसे "तस्येदम्" सूत्रसे अण् प्रत्यय होकर "नस्तद्धिते" इस सूत्रसे टि (अन्) का लोप होकर यह पद निष्पन्न होता है। ५५ वें श्लोकमें मानससरोवरका वर्णन किया गया है। अव्यक्तं=न व्यक्तम् (नञ्०)। आप्तवाचः=आप्तस्य वाचः (ष० त०), "आप्त" कहते हैं यथार्थ वक्ताको। यहाँपर "आप्त" पदसे परमात्मा विवक्षित हैं। आप्त अर्थात् परमात्माकी रचित वाणी होनेसे न्यायदर्शनके अनुसार "आप्तवाचः" का अर्थ हुआ है वेद। मीमांसक वेदको अपौरुषेय (पुरुषसे अनिर्मित)

मानते हैं, अतएव उनके मतके अनुसार आप्ता (विश्वस्ता) वाक् (वाणी) येषां ते (बहु०) विश्वस्त वाणीवाले मुनिलोग उद्दिष्ट हैं। उदाहरन्ति= उद् + आङ् + हृञ् + झिः। सांख्य शास्त्रके अनुसार जैसे बुद्धिका कारण प्रकृति है उसी प्रकार सरयूका कारण मानससरोवर हैं; ऐसा कहनेसे यहाँ उपमा अलंकार है। उपजाति छन्द है ॥ ६० ॥

जलानि या तीरनिखातयूपा[1] वहत्ययोध्यामनु राजधानीम्।
तुरङ्गमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥६१॥

अन्वयः—तीरनिखातयूपा या तुरङ्गमेधाऽवभृथाऽवतीर्णैः इक्ष्वाकुभिः, पूर्वैः पुण्यतरीकृतानि जलानि अयोध्यां राजधानीम् अनुवहति ॥ ६१ ॥

व्याख्या—(हे सीते !) तीरनिखातयूपा=तटाऽवदारितयूपा, या= सरयूः, तुरङ्गमेधाऽवभृथावऽतीर्णैः=अश्वमेधदीक्षान्तस्नानाऽरूढैः, इक्ष्वाकुभिः= इक्ष्वाकुवंशोत्पन्नैः, नः=अस्माकं, पूर्वैः=पूर्वजैः, पुण्यतरीकृतानि=पवित्रत- रीकृतानि, जलानि=अम्बूनि, अयोध्यां=तदाख्यां, राजधानीम्, अनु= समीपे, वहति=प्रापयति ॥ ६१ ॥

अनुवादः—हे सीते ! किनारेमें गाड़े गये यूपोंसे युक्त जो सरजू नदी, अश्वमेध यज्ञके अवभृथस्नानके लिए उतरे हुऐ इक्ष्वाकुवंशमें उत्पन्न हमलोगोंके पूर्वजोंसे अत्यन्त पवित्र किये गये जलको अयोध्या राजधानीके समीप पहुँचाती है ॥ ६१ ॥

टिप्पणी—तीरनिखातयूपा=नि+खन+क्तः निखातः। निखाता यूपा यस्यां सा (बहु०) तीरे निखातयूपा (स० त०)। यज्ञमें जिस काष्ठमें पशुको बांधते हैं, उसे "यूप" कहते हैं। तुरङ्गमेधाऽवभृथाऽवतीर्णैः=तुरङ्गः मेध्यते (हिंस्यते) अस्मिन् स तुरङ्गमेधः, तुरङ्ग-उपपदपूर्वक "मेधृ संगमे च" धातुसे अधिकरणमें घञ् प्रत्यय हुआ है। तुरङ्गमेधस्य अवभृथः (ष० त०)। अव+तॄ+क्तः=अवतीर्णः। तुरङ्गमेधाय अवतीर्णाः तैः (च० त०)। "अश्वमेध" यज्ञ करनेका अधिकारी सार्वभौम क्षत्रिय राजा ही माना गया है। उत्तम लक्षणवाले अश्वको प्रोक्षण कर योद्धाओंके संरक्षणमें छोड़ देते थे। जिन जिन राज्योंमें वह जाता था उनके स्वामी या तो अश्वमेधके

१. "यूपैः" इति पाठान्तरम्।

अनुष्ठाता सार्वभौमकी अधीनता स्वीकार करते थे, नहीं तो उस अश्वको बन्धनमें डाल देते थे, अश्वके संरक्षक उनको परास्त करते थे तो यज्ञकी पूर्णता होती थी। १ सालके बाद उस अश्वका आलम्भन कर उसकी वसाका हवन आदि कृत्य किया जाता था। ब्रह्महत्याके पापका क्षय, स्वर्ग और मोक्ष इसका फल माना गया है। इक्ष्वाकुभिः=इक्ष्वाकूनाम् अपत्यानि पुमांसः इक्ष्वाकवः, तैः, यहाँपर जनपद और क्षत्रिय अर्थके वाचक 'इक्ष्वाकु' शब्दसे "जनपद-शब्दात्क्षत्रियादञ्" इस सूत्रसे जो अञ् प्रत्यय हुआ था उसका बहुवचनमें "तद्राजस्य बहुषु तेनैवाऽस्त्रियाम्" इस सूत्रसे लुक् होनेसे क्षादिवृद्धि नहीं हुई। पुण्यतरीकृतानि=अतिशयेन पुण्यानि पुण्यतराणि, यहाँ पर 'पुण्य, शब्द-से "द्विवचन,विभज्योपपदे तरबीयसुनौ" इस सूत्रसे तरप् प्रत्यय हुआ है। अपुण्यतराणि पुण्यतराणि यथा संपद्यन्ते तथा कृतानि, पुण्यतर+च्वि (अभूत-तद्भावे)+कृत+क्तः। अयोध्याम् राजधानीम् अनु=यहाँ पर "अनु" शब्द-की 'लक्षणेत्थंभूताऽऽख्यानभागवीप्सासु प्रतिपर्यनवः" इस सूत्रसे कर्मप्रवचनीय-संज्ञा होनेसे उसके योगमें अयोध्या शब्दसे "कर्मप्रवचनीययुक्ते द्वितीया" इससे द्वितीया विभक्ति हुई है। वहति="वह् प्रापणे" धातुसे लट् हुआ है। उप-जाति छन्द है ॥ ६१ ॥

यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम्।
सामान्यधात्रीमिव मानसं मे सम्भावयत्युत्तरकोसलानाम् ॥ ६२ ॥

अन्वयः—(हे सीते !) यां मे मानसं सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम् उत्तरकोसलानां सामान्यधात्रीम् इव संभावयति ।६२।

व्याख्या—(हे सीते !) यां=सरयूं, मे=मम, मानसं=चित्तं कर्तृभू-तम्। सैकतोत्संगसुखोचितानां—पुलिनाऽङ्कसुखाऽभ्यस्तानां, प्राज्यैः=प्रभूतैः, पयोभिः=जलैः (सरयूपक्षे), पयोभिः=दुग्धैः (मातृपक्षे), परिवर्धितानां=पुष्टानाम्, उत्तरकोसलानाम्=उत्तरकोसलेश्वराणां, सामान्यधात्रीम्, इव=साधारणमातरम् इव, संभावयति=सत्करोति ॥ ६२ ॥

भावाऽर्थः—हे सीते ! यां सरयूं मदीयं चित्तं तटरूपोत्संगस्थितानां प्रचुर-पयोभिः पुष्टानामयोध्याऽधीश्वराणां साधारणमातरम् इव विमृशति ॥ ६२ ॥

अनुवादः—हे सीते ! जिस सरयूको मेरा चित्त तटरूप गोदमें (माताके पक्षमें तटके सदृश गोदमें) सुखसे रहनेमें अभ्यस्त पर्याप्त पय (सरयू—पक्षमें

जल और माताके पक्षमें दूध) से परिपुष्ट किये गये उत्तरकोसलके राजाओंकी सामान्य माताके समान सत्कार करता है ॥ ६२ ॥

टिप्पणी—मानसं=मन एव मानसम्, यहाँ पर मनस् शब्दसे स्वार्थ (प्रकृतिके अर्थ) में अण् प्रत्यय हुआ है।

सैकतोत्संगसुखोचितानां=सैकतम् एव उत्संगः (रूपक स०), तस्मिन् सुखं (स० त०), तस्मिन् उचिताः, तेषाम् (स० त०)। प्राज्यैः="प्राज्यमदभ्रं बहुलं बहु" इत्यमरः। पयोभिः="पयः क्षीरं पयोऽम्बु चे"त्यमरः। परिवर्धितानां=परि+वृध्+णिच्+क्तः।

उत्तरकोसलानाम्=भारतीय भुवनकोष (भूगोल) के अनुसार कोसल राज्यके दो भेद हैं उत्तर कोसल और दक्षिण कोसल। उत्तर कोसल की राजधानी अयोध्या है, दक्षिण कोसल अर्थात् विदर्भ (आधुनिक नाम वरार) की राजधानी का नाम कुण्डिनपुर है। सामान्यधात्रीम्-दधातीति धात्री, धा+तृच्+ङीप्।

"धात्री जनन्यामलकीवसुमत्युपमातृषु !" इति विश्वः। सामान्या चाऽसौ धात्री, ताम् (क० धा०)। संभावयति=सं+भू+णिच्+लट्+तिप्। इस श्लोकमें सैकतमें उत्सगका आरोप होनेसे रूपक, 'पयः' पदका जल और दूध अर्थ होनेसे श्लेष, "सामान्यधात्रीम् इव" इसमें उत्प्रेक्षा अलङ्कार है। इन्द्रवज्रा छन्द है ॥ ६२ ॥

सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता[1]।
दूरे[2] वसन्तं शिशिरानिलैर्मां तरङ्गहस्तैरुपगूहतीव ॥ ६३ ॥

अन्वयः—(हे सीते !) मदीया जननी इव मान्येन तेन राज्ञा वियुक्ता सा इयं सरयूः दूरे वसन्तं मां शिशिराऽनिलैः तरंगहस्तैः उपगूहति इव ॥६३॥

व्याख्या—(हे सीते !) मदीया=मामकीना, जननी इव=माता इव, कौसल्या इवेत्यर्थः। मान्येन=पूज्येन, तेन=दिवंगतेन, राज्ञा=महाराजेन, दशरथेनेत्यर्थः। वियुक्ता=विप्रयुक्ता, सा=पूर्वदृष्टा, इयं=सन्निकृष्टस्था, सरयूः=नदी, दूरे=विप्रकृष्टप्रदेशे, वसन्तं=निवसन्तं, प्रोष्यागच्छन्तमिति भावः। मां=

---

१. "मुक्ते" ति पाठान्तरम्।
२. "दूरेपि" इति पाठान्तरम्।

रामं, शिशिरानिलैः=शीतवातैः, तरङ्गहस्तैः=ऊर्मिरूपकरैः, उपगूहति इव= आलिङ्गति इव ॥ ६३ ॥

भावाऽर्थः—हे सीते ! मामकीना मातेव पूज्येन पित्रा विरहिता सेयं सरयूः प्रोष्यागच्छन्तं मां शीतवातैरूर्मिकरैरालिङ्गतीव ॥ ६३ ॥

अनुवादः–हे सीते ! मेरी माता कौसल्याके समान, पूज्य राजा (दशरथ-जी) से विरहिता वह सरयू नदी, प्रवासमें, रहकर लौटे हुए मुझको शीतल वायुवाले तरंगरूप हाथों से जैसे आलिंगन कर रही है ॥ ६२ ॥

टिप्पणी—मदीया=मम इयम्, यहाँपर "अस्मद्', शब्दसे "त्यदादीनि च" इस सूत्रसे वृद्धसंज्ञा होनेसे "वृद्धाच्छः" इस सूत्रसे छ प्रत्यय होकर "आयने-यीनीयियः० "इत्यादि सूत्रसे 'छ'के स्थानमें "ईय" होकर "प्रत्ययोत्तरपदयोश्च" इससे प्रत्ययके परे रहते 'अस्मद्' के स्थानमें "मत्" आदेश होकर स्त्रीत्व-विवक्षा में टाप् प्रत्यय हुआ है। जननी=जनयतीति जन्+ल्युट्+ङीप्। मान्येन=मान+ण्यत्। वियुक्ता=वि+युज्+क्त+टाप्। वसन्तं=वस+ लट् (शतृ)। शिशिराऽनिलैः=शिशिरः अनिलः येषां ते शिशिरानिलाः तैः (बहु०)। तरंगहस्तैः=तरंगा एव हस्ताः, (रूपक०)। उपगूहति=उप+ गुह+लट्+तिप्। इस श्लोकमें उपमा और उत्प्रेक्षाकी निरपेक्षतया स्थिति होनेसे संसृष्टि अलंकार है, उपजाति छन्द है ॥ ६२ ॥

विरक्तसन्ध्याकपिशं पुरस्ताद्यतो[1] रजः पार्थिवमुज्जिहीते ।
शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥६४॥

अन्वयः—(हे सीते !) विरक्तसन्ध्याकपिशं पार्थिवं रजः पुरस्तात् यतः उज्जिहीते, (तस्मात्) हनूमत्कथितवृत्तिः भरतः ससैन्यः (सन्) मां प्रत्युद्-गतः (इति) शंके ॥ ६४ ॥

व्याख्या–(हे सीते !) विरक्तसन्ध्याकपिशम्=अतिरक्तसन्ध्याताम्रवर्णं, पार्थिवं=पृथिव्याः, रजः=धूलिः, पुरस्तात्=अग्रे, यतः=यस्मात्कारणात्, उज्जिहीते=उद्गच्छति, (तस्मात्) हनूमत्कथितप्रवृत्तिः=हनूमदुक्तमदागमन-वृत्तान्तः, भरतः=कैकेयीनन्दनः, ससैन्यः=ससैनिकः सन्, माम्=अग्रजं प्रत्युद्गतः=प्रत्युद्व्रजितः (इति) शंके=तर्कयामि ॥ ६४ ॥

---

१. "यस्मात्" "एतत्" "यथे"ति च पाठान्तराणि ।

भावार्थः—हे सीते ! रक्तवर्णा पृथिव्या धूलिर्यस्मात्कारणादुद्गच्छति ततो हनूमतो मदागमनवार्ता ज्ञात्वा भरतः सैन्यैः सह मां प्रत्युद्गत इति तर्कयामि ॥

अनुवादः—हे सीते ! जिस कारण आगे लालवर्णवाली सन्ध्याके सदृश रक्तवर्णवाली पृथ्वीकी धूलि उठ रही है अतः हनूमानके कहनेसे मेरे आनेका वृत्तान्त जानकर भरतजी सेनाके साथ मेरी आगवानी करनेके लिए आ रहे हैं मैं ऐसी तर्कणा करता हूँ ॥ ६४ ॥

टिप्पणी—विरक्तसन्ध्याकपिशं=विरक्ता चाऽसौ सन्ध्या (क० धा०), सा इव कपिशम्, "उपमानानि सामान्यवचनैः" इति कर्मधारयः । पार्थिवं= पृथिव्या इदम्, पृथिवी+अण् । यतः=यस्मादिति, यद्+तसिल् । उज्जिहीते =उद्—उपसर्गपूर्वक "ओहाङ् गतौ" धातुके लट् का रूप है । "ई हल्यघोः" इस सूत्रसे ईत्व हुआ है ।

हनूमत्कथितप्रवृत्तिः=कुत्सितो हनुरस्याऽस्तीति हनूमान्, हनु मतुप । "शरादीनां च" इस सूत्रसे "हनु" के उकारका दीर्घ हुआ है । उत्पन्न होनेके अनन्तर ही उदित होते हुए लाल सूर्यको फल समझकर जब वायुपुत्र खानेके लिए तत्पर हुए थे, तब इन्द्रने उनके ऊपर वज्रप्रहार किया तब उनका हनु टेढ़ा हुआ ऐसी प्रसिद्धि है । तभीसे उनका नाम "हनूमान्" हो गया । हनूमता कथिता (तृ० त०) । हनूमत्कथिता प्रवृत्तिः यस्मै सः (बहु०) । "वार्ता प्रवृत्ति वृंत्तान्त उदन्तः स्यात्" इत्यमरः । ससैन्यः=सैन्यैः सहितः (तुल्ययोग-बहु०) । प्रत्युद्गतः=प्रति+उद्+गम्+क्तः । शङ्के="शकि शङ्कायाम्" धातुके लट् का रूप है । "शंका भयवितर्कयोः ।" इति शब्दाऽर्णवः । इसमें उपमा अलंकार है । उपजाति छन्द है ॥ ६४ ॥

[1]अद्धा श्रियं पालितसङ्गराय प्रत्यर्पयिष्यत्यनघां स साधुः ।
हत्वा निवृत्ताय मृधे खरादीन् संरक्षितां त्वामिव लक्ष्मणो मे ॥६५॥

अन्वयः—(सीते !) साधुः स पालितसङ्गराय मे अनघां संरक्षितां श्रियं मृधे खराऽऽदीन् हत्वा निवृत्ताय मै लक्ष्मणः संरक्षिताम् अनघां त्वाम् इव प्रत्यर्पयिष्यति अद्धा ॥ ६५ ॥

१. "द्धे"ति पाठान्तरम् ।

व्याख्या-(हे सीते !) साधुः=सज्जनः, सः=भरतः, पालितसङ्गराय=रक्षितपितृप्रतिज्ञाय, मे=मह्यम्, अनघाम्,=अदोषां, भोगाऽभावादनुच्छिष्टां किन्तु संरक्षितां=पालितां, श्रियं=राजलक्ष्मीं, मृधे=युद्धे, खरादीन्=खर-प्रभृतीन् राक्षसान्, हत्वा = व्यापाद्य, निवृत्ताय=परावृत्ताय, मे = मह्यं, लक्ष्मणः = सौमित्रिः, संरक्षितां = पालिताम्, अनघां=निर्दोषां, त्वाम् इव=भवतीम् इव, प्रत्यर्पयिष्यति,=समर्पयिष्यति, अद्धा=सत्यम् ।

भावाऽर्थः—हे सीते ! भरतः पालितपितृप्रतिज्ञाय मे राजलक्ष्मीं, युद्धे खरादीन् हत्वा निवृत्ताय मे लक्ष्मणस्त्वामिव प्रत्यर्पयिष्यति सत्यम् ।। ६५ ।।

अनुवादः—हे सीते ! जैसे, युद्धमें खर आदिको मारकर लोटे हुए मुझको लक्ष्मणजीने संरक्षित निर्दोष तुम्हें सौंप दिया था वैसे ही सज्जन भरतजी पिताजीकी प्रतिज्ञाका पालन करनेवाले मुझको निर्दोष और संरक्षित राज-लक्ष्मीको निश्चय सौंप देंगे ।। ६५ ।।

टिप्पणी—साधुः—साध्=उण्, "साधुर्वार्धुषिके चारौ सज्जने चाऽपि वाच्यवत् ।" इति विश्वः । पालितसङ्गराय—पालितः संगरो येन तस्मै (बहु०) । अनघाम्=अविद्यमानम् अघं यस्याः सा, ताम् (नञ्—बहु०) । संरक्षिता—सम्यक् रक्षिता, ताम् (गति०) । खरादीन्=खर आदिर्येषां ते खराऽऽदयः, तान् (बहु०) । हत्वा=हन् + क्त्वा । निवृत्ताय=नि + वृत् + क्तः । प्रत्यर्पयिष्यति—प्रति + ऋ + णिच् + लृट् + तिप् । अद्धा="तत्त्वे त्वद्धाऽञ्जसा द्वयम् ।" इत्यमरः । इस श्लोकमें उपमालंकार है । इन्द्रवज्रा छन्द है ।। ६५ ।।

असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः ।
वृद्धैरमात्यैः सह चीरवासा [1]मामर्घ्यपाणिर्भरतोऽभ्युपैति ।।६६ ।।

अन्वयः—(हे सीते !) असौ पदातिः चीरवासाः भरतः पश्चादवस्थापित-वाहिनीकः (सन्) गुरुं पुरस्कृत्य वृद्धैः अमात्यैः सह अर्घ्यपाणिः (सन्) माम् अभ्युपैति ।। ६६ ।।

व्याख्या-(हे सीते !) असौ—विप्रकृष्टस्थः, पदातिः—पादचारी, चीरवासाः—वल्कलवसनः, भरतः=कैकेयीनन्दनः, पश्चादवस्थापितवाहिनीकः=पृष्ठभाग-

---

१. "मर्घपाणि"रिति पाठान्तरम् ।

स्थापितसेनः (सन्), गुरुं = वशिष्ठं, पुरस्कृत्य = अग्रतो विधाय, वृद्धैः = प्रवयोभिः, अमात्यैः = मन्त्रिभिः, सह = समम्, अर्घ्यपाणिः = करस्थोदकादिः (सन्), माम्, अभ्युपैति = सम्मुखमागच्छति ॥ ६६ ॥

भावार्थः—हे सीते ! असौ पादचारी वल्कलवसनो भरतः सेनां पश्चादवस्थाप्य गुरुं पुरो विधाय वृद्धमन्त्रिभिः समं पूजाद्रव्यं हस्ते निधाय मत्समीपमागच्छति ॥ ६६ ॥

अनुवादः—हे सीते पैदल, वल्कल पहने हुए ये भरतजी सेनाको पीछे रखकर गुरु वशिष्ठ ऋषिको आगे कर वृद्ध मन्त्रियोंके साथ हाथमें अर्घ्य लेकर मेरे पास आ रहे हैं ॥ ६६ ॥

टिप्पणी—पदातिः = पादाभ्याम् अततीति, यहाँपर पाद—उपपदपूर्वक "अत सातत्यगमने" धातुसे "अज्यतिभ्यां पादे च" इस सूत्रसे इण् प्रत्यय होकर "पादस्य पदाज्यातिगोपहतेषु" इस सूत्रसे "पाद"के स्थानमें "पद्" आदेश हुआ है । चीरवासाः = चीरे वाससी यस्य सः (बहु०), "अत्वसन्तस्य चाऽधातोः" इससे 'सु' में दीर्घ हुआ है । पश्चादवस्थापितवाहिनीकः = पश्चात् अवस्थापिता (सुप्सुपा०), पश्चादवस्थापिता वाहिनी येन सः (बहु०) "नद्यृतश्च" इस सूत्रसे समासान्त कप् प्रत्यय हुआ है ।

"ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः" इत्यमरः । पुरस्कृत्य = "पुरोऽव्ययम्" इस सूत्रसे "पुरः" अव्यय गतिसंज्ञक होकर "कुगतिप्रादयः" इस सूत्रसे गतिसमास होकर "नमस्पुरसोर्गत्योः" इस सूत्रसे "पुरः"के विसर्गके स्थानमें "स" आदेश होकर "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इससे 'क्त्वा' के स्थानमें ल्यप् आदेश हुआ है । अमात्यः = अमा (सह) भवाः अमात्याः, तैः, यहाँ पर "अव्ययात्त्यप्" इस सूत्रसे "अमेहक्वतसित्रेभ्य एव" इस वार्तिकके अनुसार "त्यप्" प्रत्यय हुआ है । "सह" के योगमें "सहयुक्तेऽप्रधाने" इस सूत्रसे तृतीया हुई है । अर्घ्यपाणिः = अर्घार्ऽर्थमुदकम् अर्घ्यम्, यहाँपर 'अर्घ' शब्दसे "पादार्घाभ्यां च" इस सूत्रसे यत् प्रत्यय हुआ है ।

अर्घ्यं पाणौ यस्य सः, यहाँपर "सप्तमी विशेषेण बहुव्रीहौ" इस सूत्रमें "सप्तमी" पदसे ज्ञापित व्यधिकरण बहुव्रीहि समास हुआ है । यह भरतका

विधेय विशेषण है। अभ्युपैति=अभि+उपपूर्वक "इण् गतौ" धातुसे लट् हुआ है। "एत्येधत्यूठ्सु" इस सूत्रसे वृद्धि हुई है। उपजाति छन्द है ॥ ६६ ॥

पित्रा[1] विसृष्टां मदपेक्षया यः श्रियं युवाऽप्यङ्क[2] गतामभोक्ता।
इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम् ॥६७॥

अन्वयः—(हे सीते !) यः पित्रा विसृष्टाम् अङ्कगताम् अपि श्रियं युवा अपि मदपेक्षया अभोक्ता (सन्) इयन्ति वर्षाणि तया सह उग्रम् आसिधारं व्रतम् अभ्यस्यति इव ॥ ६७ ॥

व्याख्या—(हे सीते !) यः=भरतः, पित्रा=जनकेन, विसृष्टां=दत्ताम्, अङ्कगताम् अपि=उत्सङ्गप्राप्ताम् अपि, श्रियं=राजलक्ष्मीं, (पक्षान्तरे स्त्रियम्) युवा अपि=तरुणः अपि, मदपेक्षया=मद्भक्त्या, अभोक्ता=अनुपयोक्ता (सन्) इयन्ति=एतावन्ति, वर्षाणि=हायनानि, चतुर्दश वत्सरान् यावदिति भावः। तया सह=श्रिया सह, स्त्रिया सहेति व्यज्यते। उग्रं=भयङ्करं दुश्चरमित्यर्थः। आसिधारम्=आसिधारं नाम व्रतम्, अभ्यस्यति इव=आचरति इव ॥ ६७ ॥

भावार्थः—हे सीते ! यो भरतः पित्रा प्रतिपादितामुत्संगस्थितामपि राजलक्ष्मीं तरुणः सन्नपि अभोक्ता सन् चतुर्दशवर्षपर्यन्तं तया सह दुश्चरमासिधारं व्रतमाचरतीव प्रतीयते ॥ ६७ ॥

अनुवादः—हे सीते ! जिस भरतने पिताजीसे दी गई और उत्संगमें प्राप्त हुई राजलक्ष्मी रूपी स्त्री का तरुण होते हुए भी मानों मेरी भक्तिसे भोग किए विना इतने (चौदह) वर्षोंतक उस राजलक्ष्मी रूपी स्त्री के साथ ही रहकर दुष्कर असिधारा व्रत (तलवारकी धारपर चलनेके सदृश) का आचरण किया है ॥ ६७ ॥

टिप्पणी—विसृष्टां=वि+सृज्+क्त+टाप्। अङ्कगताम्=अङ्कं गता इति अङ्कगता ताम्, यहाँपर 'द्वतीया श्रिताऽतीतपतितगताऽत्यस्तप्राप्ताऽऽपन्नैः' इस सूत्रसे द्वितीयातत्पुरुष समास हुआ है। "उत्संगचिह्नयोरङ्कः" इत्यमरः। श्रियम्=यहाँपर "अभोक्ता" इस कृदन्त पदके परे रहते हुए भी उसका तृन्नन्त होनेसे 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इस सूत्रसे षष्ठीका निषेध हुआ

---

१. "निसृष्टाम्" पाठान्तरम्। २. "ङ्ग" इति पाठान्तरम्।

है, अर्थात् "कर्तृकर्मणोः कृति" इससे षष्ठी नहीं हुई। मदपेक्षया=मम अपेक्षा, तया (ष० त०)। अभोक्ता=भुनक्तीति भोक्ता, भुज्+तृन्। न भोक्ता (नञ्०)। इयन्ति=इदं परिमाणमस्ति येषां तानि, यहाँपर "इदम्" शब्दसे "किमिदम्भ्यां वो घः" इस सूत्रसे वतुप् होकर 'व' के स्थान में "घ" (इय) आदेश हुआ है। वर्षाणि=यहाँपर "कालाऽध्वनोरत्यन्तसंयोगे" इस सूत्रसे कालके अत्यन्त संयोगमें द्वितीया विभक्ति हुई है। आसिधारम्—असेर्धारा (ष० त०), असिधाराया इदम्, असिधारा+अण्। आसिधार व्रतके विषयमें यासव ने लिखा है—

'युवा युवत्या सार्धं यन्मुग्धभर्तृवदाचरेत्।
अन्तर्निवृत्तसंगः स्यादासिधारव्रतं हि तत्॥'

अर्थात् कोई युवा युवतीके साथ अन्तःकरणकी आसक्तिसे रहित होते हुए जो मुग्ध (मूढ) पतिके समान आचरण करे उसे "आसिधार व्रत" कहते हैं।

युवा की गोदमें बैठी युवतीके साथ आसक्तिरहित होना तलवारकी धार पर चलनेके समान होनेसे "आसिधार वत" कहा गया है। अभ्यस्यति इव= यहाँपर क्रियोत्पेक्षा अलंकार है। उपजाति छन्द है॥ ६७॥

एतावदुक्तवति दाशरथौ तदीयामिच्छां विमानमधिदेवतया विदित्वा।
ज्योतिष्पथादवततार सविस्मयाभिरुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः॥

अन्वयः—दाशरथौ एतावत् उक्तवति (सति) विमानं तदीयाम् इच्छाम् अधिदेवतया विदित्वा सविस्मयाभिः भरताऽनुगाभिः प्रकृतिभिः उद्वीक्षितं (सत्) ज्योतिष्पथात् अवततार॥ ६८॥

व्याख्या—दाशरथौ=दशरथपुत्रे, राम इति भावः। एतावत्=इयत् (वाक्यम्), उक्तवति=कथितवति सति, विमानं=व्योमयानं पुष्पकमित्यर्थः। तदीयां=रामसम्बन्धिनीम्, इच्छां=काङ्क्षाम्, अधिदेवतया=विमानवाहिकया देवतया, विदित्वा=ज्ञात्वा, तत्प्रेरितं सदिति भावः। सविस्मयाभिः= आश्चर्ययुक्ताभिः, भरताऽनुगाभिः=भरताऽनुगामिनीभिः, प्रकृतिभिः=प्रजाभिः उद्वीक्षितम् ऊर्ध्वं दृष्टं सत्, ज्योतिष्पथात्=आकाशात्, अवततार=अवतीर्ण, भूमण्डल इति भावः॥ ६८॥

भावार्थः—रामवाक्याऽवसानाऽनन्तरं विमानवाहिकयाऽधिदेवतया रामेच्छां ज्ञात्वा भरताऽनुगामिनीभिः प्रजाभिरूर्ध्वं दृष्टं विमानमाकाशाद्भूमावववतारितम् ॥ ६८ ॥

अनुवादः—रामचन्द्रजीके ऐसा कहनेपर उनकी इच्छाको जानकर स्वचालिका अधिदेवतासे भरतका अनुसरण करनेवाली आश्चर्ययुक्त प्रजाओंसे ऊपर देखा हुआ विमान आकाशसे भूमिपर उतारा गया ॥ ६८ ॥

टिप्पणी—दाशरथौ=दशसु (दिक्षु) रथो यस्य स दशरथः (व्यधि० बहु०), रामजीके पिताका नाम दशरथ है, यह अन्वर्थ (अर्थाऽनुसारी) है। दशरथस्याऽपत्यं पुमान् दाशरथिः तस्मिन्, "दशरथ" शब्दसे "अत इञ्" इस सूत्रसे इञ् प्रत्यय हुआ है। एतावत्=एतत् परिमाणम् अस्य, तत् (एतद्+वतुप्), "आ सर्वनाम्नः', इससे आकार अन्तादेश हुआ है। उक्तवति=ब्रूञ् (वच्)+क्तवतुः (भावे सप्तमी)। तदीयां=तस्य इयं, ताम् तद्+छ (ईय) टाप्। अधिदेवतया=दीव्यतीति देवः, दिव+अच्, देव एव देवता, 'देव' शब्द से स्वार्थ (प्रकृतिके अर्थ) में "देवात्तल्" इस सूत्रसे तल् प्रत्यय हुआ है, देव+तल्+टाप=देवता। अधिका देवता अधिदेवता (गति०)। विदित्वा=विद (ज्ञाने)=क्त्वा। सविस्मयाभिः=विस्मयेन सहिताः सविस्मयाः, ताभिः (तुल्ययोगबहु०)। भारताऽनुगाभिः=अनु, (पश्चाद्) गच्छन्तीति अनु+गम्+ड+टाप्=अनुगाः, भरताभिः अनुगास्ताभिः (ष० त०)। प्रकृतिभिः=प्र+कृ+क्तिन्। उद्वीक्षितम्=उद्+वि+ईक्ष+क्तः (कर्मणि)। ज्योतिष्पथात्=ज्योतिषां (ग्रहनक्षत्राणाम्) पन्थाः ज्योतिष्पथः तस्मात् (ष० त०), "यहां पर "ऋक्पूरब्धूः पथामानक्षे" इस सूत्रसे समासान्त 'अ' प्रत्यय हुआ है। अवततार=अव+तृ+लिट्+तिप् (णल्)। यहांपर विमान स्वयम् अचेतन है, अतः उसको चलानेवाली अधिदेवताने उसको जमीनपर उतारा ऐसा समझना चाहिए। छन्द वसन्ततिलका है, इसका लक्षण है—

"उक्ता वसन्ततिलका तभजा जगौ गः" इति ॥ ६८ ॥

तस्मात्पुरःसरविभीषणदर्शितेन सेवाविचक्षणहरीश्वरदत्तहस्तः।
यानादवातरददूरमहीतलेन मार्गेण भङ्गिरचितस्फटिकेन रामः॥

अन्वयः—रामः सेवाविचक्षणहरीश्वरदत्तहस्तः (सन्) पुरःसरविभीषणदर्शितेन अदूरमहीतलेन भङ्गिरचितस्फटिकेन मार्गेण तस्मात् यानात् अवातरत् ॥ ६९ ॥

व्याख्या—रामः = रामचन्द्रः, सेवाविचक्षणहरीश्वरदत्तहस्तः = परिचरणनिपुणसुग्रीवदत्तहस्ताऽऽलम्बः सन्, पुरःसरविभीषणदर्शितेन = अग्रसरविभीषणप्रदर्शितेन, अदूरमहीतलेन = आसन्नभूतलेन, भङ्गिरचितस्फटिकेन = विच्छित्तिनिर्मितस्फटिकेन, मार्गेण = पथा, तस्मात् = पूर्वोक्तात्, यानात् = पुष्पकविमानात्, अवातरत् = अवतीर्णः ॥ ६९ ॥

भावार्थः—रामः सुग्रीवहस्तमवलम्ब्य विभीषणदर्शितेन समीपभूतलेन स्फटिकमयेन पथा पुष्पकविमानात् अवतीर्णः ॥ ६९ ॥

अनुवादः—रामचन्द्रजी सेवामें निपुण वानरराज सुग्रीवके हाथका सहारा लेकर आगे चलते हुए विभीषणसे प्रदर्शित निकटस्थित भूमिवाले बीच-बीचमें स्फटिक मणिकी रचनासे शोभित सोपानमार्गसे उस पुष्पक विमानसे भूमिपर उतरे ॥ ६९ ॥

टिप्पणीः—रामः = रम् + घञ् (अधिकरणे), सेवाविचक्षणहरीश्वरदत्तहस्तः=सेवायां विचक्षणः (स० त०)। हरीणाम् ईश्वरः (ष० त०)। सेवाविचक्षणश्चाऽसौ हरीश्वरः (क० धा०)। दत्तो हस्तो यस्य सः (बहु०)। सेवाविचक्षणहरीश्वरेण दत्तहस्तः (तृ० त०)। पुरःसरविभीषणदर्शितेन–पुरः सरतीति पुरःसरः, यहाँपर पुरस् उपपदपूर्वक सृ "धातुसे "पुरोऽग्रतोऽग्रेषु सर्तेः" इस सूत्रसे टप्रत्यय हुआ है। पुरःसरश्चाऽसौ विभीषणः (क० धा०)। दृश् + णिच् + क्तः = दर्शितः। पुरःसरविभीषणेन दर्शितः (तृ० त०), तेन। अदूरमहीतलेन = न दूरम् (आसन्नम्) नञ्०। मह्याः तलम्, (ष० त०), "अधःस्वरूपयोरस्त्री तलम्" इत्यमरः। अदूरं महीतलं यस्य, तेन (बहु०)। भङ्गिरचितस्फटिके = रचिताः स्फटिका यस्मिन् (बहु०-)। भङ्गिभिः रचितस्फटिकः, तेन (तृ० त०)। यानात् = यान्ति अनेन इति यानः, तस्मात्, (अपादाने पञ्चमी)। "या प्रापणे" धातु से "करणाऽधिकरणयोश्च" इस सूत्रसे करणके अर्थमें ल्युट् प्रत्यय हुआ है। जिससे लोग गन्तव्य स्थानमें

पहुँचते हैं उसे 'यान' (सवारी) कहते हैं। अवातरत्=अव+तॄ+लङ्। वसन्ततिलका छन्द है॥ ६९॥

इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य स[1] भ्रातरं भरतमर्घ्यपरिग्रहान्ते।
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ तद्भक्त्यपोढपितृराज्यमहाभिषेके॥

अन्वयः—प्रयतः स इक्ष्वाकुवंशगुरवे प्रणम्य अर्घ्यपरिग्रहाऽन्ते पर्यश्रुः (सन्) भ्रातरं भरतम् अस्वजत, तद्भक्त्यपोढपितृराज्यमहाभिषेके मूर्धनि उपजघ्रौ च॥ ७०॥

व्याख्या—प्रयतः=पवित्रः, सः=रामः, इक्ष्वाकुवंशगुरवे=इक्ष्वाकुकुलाऽऽचार्याय, वशिष्ठायेत्यर्थः। प्रणम्य=नमस्कृत्य, अर्घ्यपरिग्रहाऽन्ते=अर्घ्यस्वीकाराऽवसाने, पर्यश्रुः=परिगताऽऽनन्दवाष्पः सन्, भ्रातरम्=अनुजं भरतं=कैकेयीतनूजम्, अस्वजत=आलिङ्गत। तद्भक्त्यपोढपितृराज्यमहाऽभिषेके=रामभक्तिपरिहृतपितृराज्यमहाभिषेके, मूर्धनि=भरतशिरसि, उपजघ्रौ च=आघ्रातवांश्च॥ ७०॥

भावार्थः—रामः कुलाचार्यं वशिष्ठं प्रणम्य अर्घ्यं स्वीकृत्य परिगताऽऽनन्दवाष्पः सन् भरतमालिङ्गय स्वभक्तिपरित्यक्तपितृराज्याऽभिषेके भरतशिरसि आघ्रातवांश्च॥ ७०॥

अनुवादः—पवित्र रामचन्द्रजीने इक्ष्वाकुवंशके गुरु वशिष्ठजीको प्रणामकर अर्घ्य स्वीकार करनेके अनन्तर आनन्दजन्य अश्रुओंको गिराते हुए भाई भरतको आलिङ्गन किया और अपनी भक्तिसे पिता (दशरथ) के राज्यके महाभिषेकका त्याग करनेवाले भरतके सिरको सूंघा॥ ७०॥

टिप्पणी—प्रयतः=प्र+यम्+क्तः। इक्ष्वाकुवंशगुरवे=इक्ष्वाकोः वंशः (ष० त०), तस्य गुरुः, तस्मै (ष० त०)। यहाँपर "क्रियया यमभिप्रैति सोऽपि सम्प्रदानम्" इस वार्तिकसे संप्रदान संज्ञा होकर चतुर्थी हुई है। प्रणम्य प्र+नम्+क्त्वा (ल्यप्)। अर्घ्यपरिग्रहान्ते=अर्घ्यस्य परिग्रहः (ष० त०) तस्य अन्तः, तस्मिन् (ष० त०)। पर्यश्रुः=परिगतानि अश्रूणि यस्य सः (बहु०)। अस्वजत='स्वञ्ज परिष्वङ्गे' धातुके लङ्का एकवचनका रूप है।

---

१. 'सभ्रातरम्' इति समस्तरूपं पाठान्तरम्।

'दंशसञ्जस्वञ्जां शपि' इस सूत्रसे शप्‌के परे रहते 'नकार' का लोप हुआ है।

तद्भक्त्यपोढपितृराज्यमहाभिषेके = तस्मिन् भक्तिः (स० त०) । अप + वह + क्तः = अपोढः । तद्भक्त्या अपोढः (तृ० त०) पितुः राज्यं (ष० त०) महाँश्चाऽसौ अभिषेकः (क० धा०) । पितृराज्ये महाभिषेकः (स० त०) तद्भक्त्यपोढः पितृराज्यमहाभिषेको येन, तस्मिन् (बहु०) । उपजघ्रौ = उप-उपसर्गपूर्वक 'घ्रा गन्धोपादाने' धातुसे लिट्‌के प्रथमपुरुषके एकवचनका रूप है । 'आत औ णलः' इस सूत्रसे णल्‌के स्थानमें औकार आदेश हुआ है । पुत्र और छोटे भाईका मस्तक सूँघना भारतीय शिष्टाचारका अंग है । वसन्त-तिलका छन्द है ॥ ७० ॥

श्मश्रुप्रवृद्धिजनितान[1]नविक्रियांश्च
[2]प्लक्षान् प्ररोहजटिलानिव मन्त्रिवृद्धान् ।
[3]अन्वग्रहीत्प्रणमतः शुभदृष्टिपातै[4]-
र्वार्तानुयोगमधुराक्षरया च वाचा ॥ ७१ ॥

अन्वयः—श्मश्रुप्रवृद्धिजनिताऽऽननविक्रियान् प्ररोहजटिलान् प्लक्षान् इव प्रणमतो मन्त्रिवृद्धांश्च शुभदृष्टिपातैः वार्ताऽनुयोगमधुराऽक्षरया वाचा च अन्वग्रहीत् ॥ ७१ ॥

व्याख्या—श्मश्रुप्रवृद्धिजनिताऽऽननविक्रियान् = मुखरोमाऽभिवृद्धयुत्पन्न-मुखविकारान्; अत एव प्ररोहजटिलान् = शाखाऽवलम्बिमूलजटावतः, प्लक्षान् इव = न्यग्रोधान् इव स्थितान्, प्रणमतः = प्रणामं कुर्वतः, मन्त्रिवृद्धांश्च = सचिवस्थविरांश्च, शुभदृष्टिपातैः = कृपाऽऽर्द्रविलोकनैः, वार्ताऽनुयोगमधुराऽक्षरया = कुशलप्रश्नकोमलवर्णया, वाचा च = वाण्या च, अन्वग्रहीत् = अनुग्रहीत-वान् राम इति शेषः ॥ २१ ॥

भावार्थः—रामो दीर्घकूर्चान् प्रणमतो मन्त्रिवृद्धान् कृपार्द्रैरवलोकनैः कुशलप्रश्नेन च अनुगृहीतवान् ॥ ७१ ॥

---

१. "कृति" इति पाठान्तरम् । २. "वृक्षान्" इति पाठान्तरम् ।
३. "प्रत्यग्रहीत्" इति पाठान्तरम् । ४. "दानैः" इति पाठान्तरम् ।

अनुवादः—रामचन्द्रजीने दाढ़ी और मूंछके बढ़नेसे विकृत मुखवाले जटावाले वरगदके पेड़ोंके समान, प्रणाम करनेवाले वृद्ध मन्त्रियोंको कृपासे आर्द्र अवलोकनोंसे और कुशल प्रश्नसे कोमल अक्षरवाली वाणीसे भी अनुगृहीत किया ॥ ७१ ॥

टिप्पणी—श्मश्रुप्रवृद्धिजनिताऽऽननविक्रियान्=प्रकृष्टा वृद्धिः प्रवृद्धिः (गति०) तया जनिता (तृ० त०) आननेषु विक्रिया (स० त०)। श्मश्रुप्रवृद्धिजनिता आननविक्रिया येषां ते, तान् (वहु०)। प्ररोहजटिलान्=प्र+रुह+घञ्=प्ररोहः। प्ररोहैः, जटिलाः तान् (तृ० त०)। प्रणमतः—प्रणमन्तीति प्रणमन्तः तान्, प्र+णम्+लट् (शतृ)। मन्त्रिवृद्धान्=मन्त्रः (गुप्तभाषणम्) अस्ति येषां ते मन्त्रिणः, मन्त्र+इनिः। मन्त्रिणश्च ते वृद्धाः तान् (क० धा०) शुभदृष्टिपातैः—दृष्टयोः पाताः (ष० त०) शुभाश्च ते दृष्टिपाताः, तैः (क० धा०) वार्तानुयोगमधुराऽक्षरया=अनु+युज्+घञ्=अनुयोगः। वार्तस्य अनुयोगः (ष० त०)। "वार्तं फल्गुन्यरोगे च त्रिषु" इत्यमरः। नीरोगको "वार्त" कहते हैं, यहांपर यह कुशल अर्थमें प्रयुक्त है। अथवा—वार्तायाः अनुयोगः अर्थात् वृत्तान्त (खवर) का प्रश्न यह अर्थ भी हो सकता है। मधुरा अक्षरा यस्यां सा (वहु)। वार्तानुयोगेन मधुराक्षरा तया (तृ० त०) अन्वग्रहीत्=अनु+ग्रह+लुङ्+तिप्। इस श्लोकमें उपमा अलंकार है। वसन्ततिलका छन्द है ॥ ७१ ॥

[1]दुर्जातबन्धुरयमृक्षहरीश्वरो मे पौलस्त्य एष [2]समरेषु पुरः प्रहर्ता।
इत्यादृतेन[3] कथितौ रघुनन्दनेन व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥

अन्वयः—"अयं मे दुर्जातबन्धुः ऋक्षहरीश्वरः, एष समरेषु पुरः प्रहर्ता पौलस्त्यः" इति आदृतेन रघुनन्दनकथितौ उभौ लक्ष्मणं व्युत्क्रम्य भरतो ववन्दे ॥ ७२ ॥

व्याख्या—अयम्=एषः, मे=मम, दुर्जातबन्धुः=आपद्बन्धुः, ऋक्ष-

१. "दुःखैकबन्धुः" इति पाठान्तरम्। २ "समरे चे" ति पाठान्तरम्।
३ "दरेणे"ति पाठान्तरम्।

हरीश्वरः=भल्लूकवानराऽधीशः, सुग्रीव इत्यर्थः । एषः निकटस्थः, समरेषु=युद्धेषु, पुरः प्रहर्ता=प्राक् प्रहारकर्ता, पौलस्त्यः=विभीषणः, इति=इत्थम्, आदृतेन=आदरवता, रघुनन्दनेन=रामचन्द्रेण, कथितौ=उक्तौ, उभौ=विभीषणसुग्रीवौ, लक्ष्मणं=सौमित्रिं, व्युत्क्रम्य, आलिङ्गनाऽऽदिभिरसंभाव्येति भावः । भरतः कैकेयीसुतः, ववन्दे=अभिवादितवान् ।। ७२ ।।

भावार्थः—"अयं मे आपद्बन्धुः सुग्रीवः एष वीरो विभीषण इति आदरकारिणा रामचन्द्रेण कथितौ सुग्रीवविभीषणौ भरतो लक्ष्मणमालिङ्गनादिभिरसंभाव्य प्रणनाम ।। ७२ ।।

अनुवादः—"ये मेरे आपत्तिके बान्धव भालुओं और वानरोंके राजा सुग्रीव हैं, ये युद्धोंमें आगे प्रहार करनेवाले विभीषण हैं" इस प्रकार आदर करनेवाले रामचन्द्रजीसे कहे गये दोनों (सुग्रीव और विभीषण) को भरतजी ने लक्ष्मणको आलिङ्गन आदिसे सत्कार करनेके पहले अभिवादन किया ।।७२।।

टिप्पणी—दुर्जातबन्धुः=दुष्टं जातं (जन्म) यस्य तत् दुर्जातम् (बहु०) 'दुर्जातं व्यसनं प्रोक्तम्' इति विश्वः । दुर्जाते बन्धुः (स० त०) ऋक्षहरीश्वरः=ऋक्षाश्च हरयश्च (द्वन्द्वः), ऋक्षहरीणाम् ईश्वरः (ष० त०) । प्रहर्ता=प्रहरतीति, प्र + हृञ् + तृच् । पौलस्त्यः=पुलस्त्यस्याऽपत्यं पुमान्, पुलस्त्य + अण् । आदृतेन=आङ् + दृ + क्तः (कर्तरि) । रघुनन्दनेन—नन्दयतीति नन्दनः (टु + नदि + णिच् + ल्युः) । रघूणां नन्दनः तेन (ष० त०) । कथितौ=कथ + णिच् + क्तः (कर्मणि) व्युत्क्रम्य=वि + उद् + क्रम् + क्त्वा (ल्यप्), ववन्दे='वदि अभिवादनस्तुत्योः' धातुके लिट्के प्रथम पुरुषका एकवचन है । वसन्ततिलका छन्द है ।। ७२ ।।

सौमित्रिणा तदनु संससृजे स चैनमुत्थाप्य नम्रशिरसं भृशमालिलिङ्ग ।
रूढेन्द्रजित्प्रहरणव्रणकर्कशेन क्लिश्नन्निवास्य भुजमध्यमुरःस्थलेन ।।

अन्वयः—तदनु सः सौमित्रिणा संससृजे नम्रशिरसम् एनम् उत्थाय रूढेन्द्रजित्प्रहरणव्रणकर्कशेन अस्य उरःस्थलेन भुजमध्यं क्लिश्नन् इव भृशम् आलिलिङ्ग च ।। ७३ ।।

व्याख्या—तदनु=सुग्रीवाऽऽदिवन्दनाऽनन्तरं, सः=भरतः सौमित्रिणा=लक्ष्मणेन, संससृजे=संगतः, नम्रशिरसं=प्रणतम्, एनं=सौमित्रं, उत्थाप्य=उत्थितं विधाय, रूढेन्द्रजित्प्रहरणव्रणकर्कशेन=उत्पन्नमेघनादाऽस्त्र-व्रणकठोरेण, अस्य=सौमित्रेः, उरःस्थलेन=वक्षःस्थलेन, भुजमध्यं=वाहु-मध्यं, स्वकीयमिति शेषः, क्लिश्नन् इव=पीडयन् इव, भृशं=गाढम्, आलि-लिङ्ग च=आलिङ्गितवांश्च ॥ ७३ ॥

भावाऽर्थः—भरतः सुग्रीवविभीषणवन्दनाऽनन्तरं नम्रमस्तकं लक्ष्मणमु-त्थाप्य आलिङ्गितवांश्च ॥ ७३ ॥

अनुवादः—उसके अनन्तर भरतजी लक्ष्मणसे मिले। उन्होंने प्रणाम कर झुके हुए उनको उठाकर इन्द्रजितके आयुधोंके प्रहारसे उत्पन्न व्रणोंसे कठोर उनकी छातीसे अपनी छातीको पीड़ित करते हुए गाढ़ आलिङ्गन भी किया ॥ ७३ ॥

टिप्पणी—सौमित्रिणा=सुमित्राया अपत्यं पुमान् सौमित्रिः, तेन, सुमित्रा+इञ्। संससृजे=सम्–उपसर्गपूर्वक 'सृज विसर्गे' इस दिवादिके धातुसे कर्ताके अर्थमें लिट् हुआ है। नम्रशिरसं–नमनशीलं नम्रम्, "णम् प्रह्वत्वे शब्दे" धातुसे "नमिकम्पिस्म्यजस्कमहिंसदीपो रः" इस सूत्रसे र प्रत्यय हुआ है। नम्+रः। नम्रं शिरो यस्य स नम्रशिराः तम् (बहु०)। उत्थाप्य=उद्+स्था+णिच्+क्त्वा (ल्यप्) रूढेन्द्रजित्प्रहरणव्रतकर्कशेन–इन्द्रं जयतीति इन्द्रजित्, इन्द्र+जि+क्विप्। इन्द्रजितः प्रहरणानि (ष० त०) प्र+हृ+ल्युट्। इन्द्रजित्प्रहरणैः व्रणानि (तृ० त०) रूढानि च तानि इन्द्रजित्प्रहरण-व्रणानि, तैः (क० धा०) रूढेन्द्रजित्प्रहरणव्रणैः कर्कशं, तेन (तृ० त०)। उरःस्थलेन=उरसः स्थलं, तेन (ष० त०)। भुजमध्यं=भुजयोः मध्यं, तत् (ष० त०) क्लिश्नन्=क्लिश्नातीति, यहाँपर क्र्यादिस्थ "क्लिश् विबाधने" धातुसे श्ना प्रत्यय और लट्के स्थानमें शतृ हुआ है। यह धातु "क्लिश्नाति भुवनत्रयम्" ऐसा प्रयोग देखनेसे सकर्मक है। आलिलिङ्ग=आङ्-उपसर्गपूर्वक 'लिगि चित्रीकरणे' धातुके लिट्के प्रथम पुरुषमें एकवचनमें प्रयोग हुआ है। इस श्लोकमें उत्प्रेक्षा अलंकार और वसन्ततिलका छन्द है ॥ ७३ ॥

रामाज्ञया हरिचमूपतयस्तदानीं कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान् ।
[1]तेषु क्षरत्सु बहुधा मदवारिधाराः शैलाधिरोहणसुखान्युपलेभिरे ते ॥

अन्वयः—तदानीं हरिचमूपतयः रामाऽऽज्ञया मनुष्यवपुः कृत्वा गजेन्द्रान् आरुरुहुः, बहुधा मदवारिधाराः क्षरत्सु तेषु ते शैलाधिरोहणसुखानि उपलेभिरे ॥

व्याख्या—तदानीं = तस्मिन् समये, हरिचमूपतयः = वानरसेनापतयः, रामाज्ञया = राघवाऽऽदेशेन, मनुष्यवपुः = नरशरीरं, कृत्वा=विधाय, गजेन्द्रान् हस्तिश्रेष्ठान्, आरुरुहुः = आरूढवन्तः, बहुधा=अनेकशः, मदवारिधाराः=दान-जलधाराः, क्षरत्सु=वर्षत्सु, तेषु = गजेन्द्रेषु, ते=हरिचमूपतयः, शैलाऽधिरोहण-सुखानि = पर्वताऽऽरोहणाऽऽनन्दान् उपलेभिरे=अनुभूतवन्तः ॥ ७४ ॥

भावाऽर्थः—तस्मिन् समये, वानरसेनापतयो रामाज्ञया नरशरीरं गृहीत्वा गजेन्द्ररूढाः अनेकशो मदजलानि क्षरत्सु तेषु पर्वताऽरोहणसुखं प्राप्तवन्तश्च ॥

अनुवादः—उस समय वानरसेनापति रामचन्द्रजीकी आज्ञासे (कामरूपी होनेसे) मनुष्यशरीरधारण कर श्रेष्ठ हाथियों पर सवार हुए, अतिशय मद-धाराओंको गिराते हुए उन पर उन्होंने (वानरसेनापतियोंने) पहाड़ों पर चढ़नेके सुख को प्राप्त किया ॥ ७४ ॥

टिप्पणी—तदानीं = तस्मिन्काले, 'तद्' शब्दसे "तदो दा च" इस सूत्रसे "दानीम्" भी हो गया है। हरिचमूपतयः—हरीणां चम्वः, (ष० त०), 'पृतनाऽनीकिनी चमूः" इत्यमरः। हरिचमूनां पतयः (ष० त०)। रामाऽऽज्ञया = रामस्य आज्ञा, तया (ष० त०)। मनुष्यवपुः—मनोरपत्यानि पुमांसो मनुष्याः, 'मनु' शब्दसे "मनोर्जातावञ्यतो षुक् च" इस सूत्रसे यत् प्रत्यय और "षुक्" आगम हुआ है। मनुष्याणां वपुः, तत् (ष० त०)। गजेन्द्रान् = गजानाम् इन्द्राः तान् (ष० त०)। आरुरुहुः=आङ् + रुह + लिङ् + झिः। बहुधा-बहुभिः प्रकारैः, 'बहु' शब्दसे 'संख्याया विधार्थे धा' इस सूत्रसे धा प्रत्यय हुआ है। मदवारिधाराः = मदस्य वारीणि (ष० त०) तेषां धाराः, ताः (ष० त०)। क्षरत्सु=क्षर् + लट् + शतृ + सुप्। पालकाप्यने "मत्त हाथी सात स्थानोंसे मद-गिराता है" ऐसा लिखा है, जैसे:—"करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मद-स्रुतिः'। अर्थात् हाथीके नाकके दो छेदोंसे, दो कपोलोंसे, उपस्थसे और दो

१. "येषु" इति पाठान्तरम्।

नेत्रोंसे मद गिरता है। शैलाऽधिरोहणसुखानि=शैलेषु अधिरोहणानि (ष० त०) तेषां सुखानि, तानि (ष० त०)। उपलेभिरे=उप-उपसर्गपूर्वक, 'डुलभष् प्राप्तौ' धातुके लिट्में प्रथमपुरुषके बहुवचन 'झ'का रूप है "लिटस्तझयोरेशिरेच्" इस सूत्रसे 'झ' के स्थानमें "इरेच्" आदेश हुआ है। "उपलम्भसवनुभवः" इत्यमरः। वसन्ततिलका छन्द है ॥ ७४ ॥

सानुप्लवः प्रभुरपि क्षणदाचराणां भेजे [1]रथान् दशरथप्रभवानुशिष्टः।
मायाविकल्परचितैरपि [2]ये तदीयैर्न स्यन्दनैस्तुलितकृत्रिम[3]भक्तिशोभाः॥

अन्वयः—साऽनुप्लवः क्षणदाचराणां प्रभुः अपि दशरथप्रभवाऽनुशिष्टः (सन) रथान् भेजे। ये मायाविकल्परचितैः अपि तदीयैः स्यन्दनैः तुलितकृत्रिमभक्तिशोभाः न (भवन्ति)॥ ७५ ॥

व्याख्या—साऽनुप्लवः=साऽनुचरः, क्षणदाचराणां=राक्षसानां, प्रभुः अपि=स्वामी अपि, विभीषणोऽपीति भावः। दशरथप्रभवाऽनुशिष्टः=रामाऽऽज्ञप्तः (सन्), रथान्=स्यन्दनान्, भेजे=सिषेवे, आरुरोह इत्यर्थः। ये=रथाः, मायाविकल्परचिताः अपि=सङ्कल्पविशेषनिर्मितैः अपि, तदीयैः=विभीषणसम्बन्धिभिः, स्यन्दनैः=रथैः, तुलितकृत्रिमभक्तिशोभाः—समीकृतक्रियानिर्वृत्तरचनाकान्तयः, न=न भवन्ति ॥ ७५ ॥

भावाऽर्थः—साऽनुचरो निशाचराऽधिपतिर्विभीषणोऽपि रामाज्ञया रथानारूढः सङ्कल्पविशेषनिर्मिता विभीषणरथा अपि येषां साम्यं न प्राप्नुवन्ति ॥

अनुवादः—अनुचरोंके साथ राक्षसोंके अधिपति विभीषण भी रामचन्द्रजीकी आज्ञासे रथोंपर आरूढ हुए जो रथ मायाकी कल्पनासे रचित विभीषणके रथोंसे भी तुलित कृत्रिम रचना की शोभावाले नहीं होते थे ॥ ७५ ॥

टिप्पणी—साऽनुप्लवः=अनुप्लवैः सहितः (तुल्ययोग बहु०), "अभिसारस्त्वनुसरः सहायोऽनुप्लवोऽनुगः" इति यादवः। क्षणदाचराणां=क्षणं ददातीति क्षणदा, क्षण+दा+क+टाप्। "निशा निशीथिनी रात्रिस्त्रियामा क्षणदा

१. "रथम्" इति पुस्तकान्तरपाठः। २. "य" इति पाठान्तरम्।
३. "भक्तिशोभी" ति पाठान्तरम्।

क्षपा ।" इत्यमरः । क्षणदायां चरन्तीति क्षणदाचराः, तेषाम्, क्षणदा उपपद-पूर्वक "चर" धातुसे "चरेष्टः" इस सूत्रसे टप्रत्यय और उपपदसमास हुआ है। दशरथप्रभवाऽनुशिष्टः=प्रभवति अस्मादिति प्रभवः, प्र-उपसर्गपूर्वक "भू" धातु-से "ऋदोरप्" इस सूत्रसे अप् प्रत्यय हुआ है। दशरथः प्रभवो (जनकः) यस्य सः (वहु०), तेन अनुशिष्टः (तृ० त०) । भेजे="भज सेवायाम्" धातुके लिट्के प्रथमपुरुषमें एकवचनका रूप है । "तृफलभजत्रपश्च" इस सूत्रसे एत्व और अभ्यास लोप हुआ है । मायाविकल्परचितैः=मायाया विकल्पाः (भेदाः), (ष० त०) तैः रचिताः, तैः (तृ० त०) । तदीयैः--तस्य इमे तदीयाः, तैः, तद्+छ (ईयः) । तुलितकृत्रिमभक्तिशोभाः=भक्तीनां शोभा (ष० त०) । क्रियया निर्वृत्ता कृत्रिमा, यहाँ पर "डुकृञ् करणे" धातुसे "ड्वितः क्त्रिः" इस सूत्रसे 'क्त्रि' प्रत्यय होकर "क्त्रेर्मम्नित्यम्" इससे मप् प्रत्यय हुआ है। कृत्रिमा चाऽसौ भक्तिशोभा (क० धा०) तुलिता कृत्रिमभक्तिशोभा येषां ते (बहु०) । वसन्ततिलका छन्द है ॥ ७५ ॥

भूयस्ततो रघुपतिर्विलसत्पताक-
मध्यास्त कामगति सावरजो विमानम् ।
दोषातनं बुधबृहस्पतियोगदृश्य-
[1]स्तारापतिस्तरलविद्युदिवाभ्र[2] वृन्दम् ॥ ७६ ॥

अन्वयः—ततो रघुपतिः साऽवरजः (सन्) विलसत्पताकं कामगति-विमानं भूयः बुधबृहस्पतियोगदृश्यः तारापतिः दोषातनं तरलविद्युत् अभ्रवृन्दम् इव अध्यास्त ॥ ७६ ॥

व्याख्या—ततः=अनन्तरं, रघुपतिः=रामः, साऽवरजः=साऽनुजः, भरतलक्ष्मणसहितः सन्नित्यर्थः । विलसत्पताकं=शोभमानध्वजं, कामगतिं=इच्छानुसारगतियुक्तम्, विमानं=व्योमयानं पुष्पकमित्यर्थः । भूयः पुनरपि, बुधबृहस्पतियोगदृश्यः=रौहिणेयवाचस्पतिसङ्गतिदर्शनीयः, तारापतिः=चन्द्रः

१. "दाराऽधिप" इति पाठान्तरम् ।
२. "कूटम्" इति पाठान्तरम् ।

दोषातनं=नैशं, तरलविद्युत्=चञ्चलसौदामनीकम्, अभ्रवृन्दम् इव=मेघसमूहम् इव, अध्यास्त=अधिष्ठितवान् ॥ ७६ ॥

भावार्थः—ततो रामो भरतलक्ष्मणसहितः सन् पताकोपेतं स्वेच्छानुसारेण विचरणशीलं विमानमध्यारूढः ॥ ७६ ॥

अनुवाद—तब रामचन्द्रजी छोटे भाई भरत और लक्ष्मणके साथ शोभित होनेवाली पताकासे युक्त इच्छाके अनुसार गतिवाले पुष्पक पिमानपर जैसे बुध और वृहस्पतिकी संगतिसे दर्शनीय तारापति (चन्द्रमा) रातमें चञ्चल बिजली वाले मेघसमूहपर आरूढ़ होते हैं वैसे ही आरूढ़ हुए ॥ ७६ ॥

टिप्पणी—ततः=तद्+तसिल्। रघुपतिः=रघूणां (रघुवंश्यानां राज्ञाम्) पतिः (श्रेष्ठः) (ष० त०)। साऽवरजः=अवरस्मिन् (काले) जातौ, अवरजौ, यहाँपर अवर-उपपदपूर्वक "जनी प्रादुर्भावे" धातुसे "सप्तम्यां जनेर्डः" इस सूत्रसे डप्रत्यय हुआ है, अवर+जन्+ड (उपपदसमासः)। अवरजाभ्यां सहितः (तुल्ययोगवहु०)। विलसत्पताकं=विलसतीति विलसन्ती, वि+लस्+लट् (शतृ) ङीप्। विलसन्ती पताका यस्मिंस्तत् (वहु०)। "स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियाऽऽदिषु" इस सूत्रसे पूर्वपदका पुंवद्भाव हो गया है। कामगतिं=कामेन गतिः यस्य तत् (व्यधिकरण०)। बुधवृहस्पतियोगदृश्यः=वृहतां पतिः, वृहस्पतिः (ष० त०)। यहाँपर "तद्वृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च" इससे सुट् होकर तकारका लोप हुआ है। बुधश्च वृहस्पतिश्च बुधवृहस्पती (द्वन्द्वः), यहाँहर "अल्पाऽच्तरम्" इस सूत्रसे बुध शब्दका पूर्वप्रयोग हुआ। युज्+घञ्+योगः। बुधवृहस्पत्योर्योगः (ष० त०), तेन दृश्यः (तृ० त०) तारापतिः=तारणां पतिः (ष० त०)। दोषातनं=दोषाभवम्, यहाँपर "दोषा" अव्ययसे "सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च" इस सूत्रसे ट्यु या ट्युल् प्रत्यय और तुट् आगम हुआ है। तरलविद्युत्=विद्योतते इति विद्युत्, वि+द्युत्=क्विप्। तरला विद्युत् यस्मिस्तत् (वहु०)। अभ्रवृन्दम्=अभ्राणां वृन्दं तत् (ष० त०)। विमान और अभ्रवृन्दसे "अध्यास्त" अधिपूर्वक "आस उपवेसने" इस धातुके योगमें "अधिशीङ्स्थाऽऽसां कर्म" इस सूत्रसे कर्मसंज्ञा होकर द्वितीया हुई है। इस श्लोकमें उपमा अलंकार है। वसन्ततिलका छन्द है ॥ ७६ ॥

तत्रेश्वरेण जगतां प्रलयादिवोर्वी
वर्षात्ययेन रुचमभ्रघनादिवेन्दोः ।
रामेण मैथिलसुतां दशकण्ठकृच्छ्रात्
प्रत्युद्धृतां धृतमतीं भरतो ववन्दे ।। ७७ ।।

अन्वयः—तत्र जगताम् ईश्वरेण प्रलयात् उर्वीम् इव वर्षाऽत्ययेन अभ्रघनात् इन्दो रुचम् इव रामेण दशकण्ठकृच्छ्रात् प्रत्युद्धृतां धृतिमतीं मैथिलसुतां भरतो ववन्दे ।। ७७ ।।

व्याख्या—तत्र=तस्मिन् । विमाने । जगताम्=लोकानाम्, ईश्वरेण=स्वामिना, आदिवराहेणेति भावः । प्रलयात्—कल्पान्तात्, उर्वीम् इव=पृथ्वीम् इव वर्षाऽत्ययेन=शरदागमेन, अभ्रघनात्=मेघसङ्घातात्, इन्दोः=चन्द्रमसः, रुचम् इव=कान्तिम् इव, चन्द्रिकाम् इवेति भावः । तथैव रामेण=रघुपतिना, दशकण्ठकृच्छ्रात्=रावणसङ्कटात्, प्रत्युद्धृतां=प्रत्युन्मोचितां, तत एव—धृतिमतीं=सन्तोषवतीं, मैथिलसुतां-सीतां, भरतः-कैकेयीनन्दनः, ववन्दे-अभिवादितवान् ।।

भावाऽर्थः—विमाने आदिवराहेण प्रलयात्पृथ्वीमिव शरदागमेन चन्द्रचन्द्रिकामिव रामेण रावणरूपसङ्कटात् प्रत्युद्धृतां सीतां भरतोऽभिवादयामास ।। ७७ ।।

अनुवादः—उस विमानपर जगदीश्वर (वराह) नें जैसे प्रलयसे पृथ्वीका उद्धार किया था, शरत् ने जैसे मेघसमूहसे चाँदनीका उद्धार किया था वैसे ही रामसे रावणरूप संकटसे प्रत्युधृता (अत एव) सन्तोषवाली सीताको भरतने अभिवादन किया ।। ७७ ।।

टिप्पणी—तत्र=तस्मिन्निति, तद्+त्रल् । जगतां=गच्छन्तीति जगन्ति, तेषाम्, यहाँपर "वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च" इस सूत्रसे वर्तमानकालमें "जगत्" शब्दका निपातन किया गया है । गम्+लट् (शतृ) । ईश्वरेण=ईष्टे असौ ईश्वरः, तेन, ईश+वरच् । कर्तांके अनुक्त होनेसे तृतीया विभक्ति हुई है । प्रलयात्=अपादानमें पञ्चमी हुई है । वर्षाऽत्ययेन=वर्षाणाम् अत्ययः (ध्वंसः) यस्मिन् सः, तेन (व्यधि०) । "स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः" इत्यमरः । अभ्रघनात्=अभ्राणां घनं तस्मात् (ष० त०) ।

दशकण्ठकृच्छ्रात्=दश कण्ठा यस्य स दशकण्ठः (बहु०)। स एव कृच्छ्रं, तस्मात् (रूपक०)। प्रत्युद्धृतां=प्रति + उद् + धृञ् + क्तः + टाप्। धृतिमतीं=प्रशस्ता धृतिः यस्याः सा धृतिमती ताम्, यहाँपर धृति' शब्दसे "तदस्याऽस्त्यस्मिन्निति मतुप्" इस सूत्रसे मतुप् प्रत्यय होकर स्त्रीत्वविवक्षामें "उगितश्च" इससे ङीप् प्रत्यय हुआ है। धृति मतुप् ङीप्। ववन्दे–'वदि अभिवादनस्तुत्योः" इस धातुसे लिट्के प्रथमपुरुषके एकवचनका रूप है यहाँपर एक उपमेयके बहुतसे उपमान होनेसे "मालोपमा" अलंकार है। वसन्ततिलका छन्द है॥ ७७॥

लङ्केश्वरप्रणतिभङ्गदृढव्रतं तद्वन्द्यं युगं चरणयोर्जनकात्मजायाः।
ज्येष्ठानुवृत्तिजटिलं च शिरोऽस्य साधोरन्योन्यपावनमभूदुभयं समेत्य॥

अन्वयः—लंकेश्वरप्रणतिभङ्गदृढव्रतं वन्द्यं तद् जनकात्मजायाः चरणयोः युगं ज्येष्ठानुवृत्तिजटिलं साधोः अस्य शिरश्च (इति) उभयं समेत्य अन्योन्य-पावनम् अभूत्॥ ७८॥

व्याख्या–लंकेश्वरप्रणतिभङ्गदृढव्रतं=रावणप्रणामनिरासाऽखण्डितपातिव्रत्यम् (अत एव) वन्द्यम्=अभिवादनीयं, तत्=पूर्ववन्दितं, जनकात्मजायाः=जानक्याः, सीताया इत्यर्थः। चरणयोः=पादयोः, युगं=युग्मं, ज्येष्ठाऽनुवृत्तिजटिलम्=अग्रजाऽनुसरणाज्जटायुक्तं, साधोः=सज्जनस्य, अस्य=भरतस्य, शिरश्च=मस्तकश्च, (इति=इत्थम्), उभयं, समेत्य=मिलित्वा, अन्योन्यपावनं=परस्परशोधकम्, अभूत्=अभवत्॥ ७८॥

भावार्थः—रावणप्रणामनिषेधकं नमस्करणीयं सीतायाश्चरणद्वयं रामाऽनुसरणेन जटायुक्तो भरतमस्तकश्चेति द्वितयं मिलित्वा परस्परशोधकं सञ्जातम्॥ ७८॥

अनुवादः—रावणके प्रणामोंको भङ्ग करनेसे दृढ़ सतीव्रतवाला अत एव अभिवादनीया सीताजीका वह चरणयुगल और ज्येष्ठ भ्राता रामके अनुसरणसे जटावाला सज्जन भरतजीका मस्तक ये दोनों ही मिलकर एक दूसरेको पवित्र करनेवाले हुए॥ ७८॥

टिप्पणी—लङ्केश्वरप्रणतिभङ्गदृढव्रतं=लङ्काया ईश्वरः (ष० त०)।

प्रणमनं प्रणतिः यहाँपर प्र—उपसर्गपूर्वक "णम प्रह्वत्वे शब्दे" इस धातुसे "स्त्रियां क्तिन्" इस सूत्रसे क्तिन् प्रत्यय हुआ है, प्र+नम्+क्तिन्=प्रणतिः। लंकेश्वरस्य प्रणतयः (ष० त०) तासां भङ्गः (ष० त०)। दृढं व्रतं यस्य तत् (बहु०)। लंकेश्वरप्रणतिभङ्गेन दृढव्रतम् (तृ० त०)। वन्द्यं वन्दितुं योग्यं, वदि+ण्यत्। तद्=यह शब्द यहाँपर प्रसिद्धाऽर्थक है अतः 'यद्' शब्दकी अपेक्षा नहीं रखता है, इसीलिए विधेयाऽविमर्श दोष नहीं होता है। जनकात्मजायाः=जनकस्य आत्मजा, तस्याः (ष० त०)। युगं="युग्मं तु युगलं युगम्" इत्यमरः। ज्येष्ठाऽनुवृत्तिजटिलम्=अतिशयेन प्रशस्यः ज्येष्ठः, यहाँपर "प्रशस्य' शब्दसे "अतिशायने तमबिष्ठनौ" इस सूत्रसे इष्ठन् प्रत्यय होकर "ज्य च" इस सूत्रसे 'प्रशस्य' के स्थानमें "ज्य" आदेस हुआ है। अनुवर्तनम् अनुवृत्तिः अनु+वृत्+क्तिन्। ज्येष्ठस्य अनुवृत्तिः (ष० त०), तया (हेतुना) जटिलम् (तृ० त०)। साधोः=साध्नोति (परकार्याणि) इति साधुः तस्य साधु+उण्। उभयम्=उभौ अवयवौ यस्य (अवयविनः) तत्, यहाँपर उभशब्दसे "संख्याया अवयवे तयप्" इससे तयप् होकर "उभादुदात्तो नित्यम्" इस सूत्रसे अयच् आदेश हुआ है। समेत्य=सम्+आङ्+इण्+क्त्वा (ल्यप्)। अन्योन्यपावनं=पावयतीति पावनम्, यहाँपर णिजन्त "पूङ् पवने" धातुसे "कृत्यलुटो बहुलम्" इस सूत्रसे "बहुलम्" ग्रहण करनेके सामर्थ्यसे कर्तामें ल्युट् प्रत्यय हुआ है। पूङ्+णिच्+ल्युट्। अन्योन्यस्य पावनम् (ष० त०)। ल्युट्+भू+लङ्+प्रथमपुरुष तिप्, यहाँपर "गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु" इस सूत्रसे सिच्का लुक् हुआ है। इस श्लोकमें अन्योन्य अलंकार है, उसका लक्षण सोदाहरण चन्द्रालोकमें दिया है—

"अन्योन्यं नाम यत्र स्यादुपकारः परस्परम्।
त्रियामा शशिना भाति शशी भाति त्रियामया;'॥

वसन्ततिलका छन्द है॥ ७८॥

क्रोशार्धं[1] प्रकृतिपुरःसरेण गत्वा काकुत्स्थः स्तिमितजवेन पुष्पकेण।
शत्रुघ्नप्रतिविहितोपकार्यमार्यः साकेतोपवनमुदारमध्युवास॥ ७९॥

१. "पुरःसरोऽर्वी"ति पाठान्तरम्।

अन्वयः—आर्यः काकुत्स्थः प्रकृतिपुरःसरेण स्तिमितजवेन पुष्पकेण क्रोशार्द्धं गत्वा शत्रुघ्नप्रतिहितोपकार्यम् उदारं साकेतोपवनम् अध्युवास ॥ ७९ ॥

व्याख्या—आर्यः=पूज्यः, काकुत्स्थः=ककुत्स्थवंशोत्पन्नः, राम इति भावः । प्रकृतिपुरःसरेण=प्रजाऽग्रसरेण, स्तिमितजवेन=मन्दवेगेन, पुष्पकेण=विमानेन, क्रोशार्धं=क्रोसार्धभागं, गत्वा=प्राप्य, शत्रुघ्नप्रतिविहितोपकार्यं=शत्रुघ्नसज्जितपटभवनम्, उदारं=महत्, साकेतोपवनम्=अयोध्याऽऽरामम्, अध्युवास=अधितष्ठौ ॥ ७९ ॥

भावाऽर्थः—रामो मन्दवेगेन पुष्पकेण क्रोशार्द्धं गत्वा शत्रुघ्नसज्जितपटभवनोपेतं महान्तमम् अयोध्याया आराममधितष्ठौ ॥ ७९ ॥

अनुवादः—पूज्य रामचन्द्रजीने प्रजाजन जिसके आगे चल रहे हैं ऐसे मन्दगतिवाले पुष्पक विमानसे आधाकोस चलकर शत्रुघ्नसे सजाये गये तम्बुओं से युक्त अयोध्याके बड़ेसे उपवनमें निवास किया ॥ ७९ ॥

टिप्पणी—आर्यः=अर्तुं योग्यः, यहाँपर 'ऋ गतौ' धातुसे 'ऋहलोर्ण्यत्' इस सूत्रसे ण्यत् प्रत्यय हुआ है" "महाकुलकुलीनाऽऽर्यसभ्यसज्जनसाधवः ।" इत्यमरः । काकुत्स्थः=ककुत्स्थस्याऽपत्यं पुमान् ककुत्स्थ+अण् । इक्ष्वाकुके वंशमें कोई 'पुरञ्जय' नामक राजा हुआ था, उसने दैत्योंके साथ जब देवताओं का युद्ध हुआ था उसमें देवताओंको सहायता की थी और वृषभरूपधारी इन्द्रके ककुद् (पीठमें स्थित माँसपिण्ड) पर चढ़कर दैत्योंको परास्त किया था तभीसे उसका नाम "ककुत्स्थ" पड़ गया था । तबसे उसके अनन्तरवर्ती राजाओंको "काकुत्स्थ" कहने लगे । प्रकृतिपुरःसरेण=पुरः सरन्तीति पुरःसर्यः, पुरस्+सृ+ट+ङीप् । प्रकृतयः पुरःसर्यो यस्य तत्, तेन (बहु०) । स्तिमितजवेन=स्तिमितो जवो यस्य, तेन (बहु०) । पुष्पकेण=गमनक्रियामें अत्यन्त उपकारक होनेसे "साधकतमं करणम्" इस सूत्रसे करणसंज्ञा होकर "कर्तृकरणयोस्तृतीया" इससे तृतीया विभक्ति हुई है । क्रोशाऽर्द्धं=क्रोशस्य अर्द्धं, तत् (ष० त०) । गत्वा=गम्+क्त्वा । शत्रुघ्नप्रतिविहितोपकार्यं=शत्रून् हन्तीति शत्रुघ्नः, शत्रु—उपपदपूर्वक "हन हिंसागत्योः" धातुसे "कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्" इस वार्तिकसे क प्रत्यय हुआ है, शत्रु+हन्+कः

(उपपदसमासः) । प्रतिविहिता उपकार्या यस्मिस्तत् (बहु०) । 'उपकार्योपकारिका" इत्यमरः । शत्रुघ्नेन प्रतिविहितोपकार्यं, तत् (तृ० त०) । उदारं= "उदारो दातृमहतोः" इत्यमरः । साकेतोपवनं साकेतस्य उपवनं तत् (ष० त०) । साकेतः स्यादयध्योयार्या कोसलानन्दिनी तथा ।" इति यादवः । अधिपूर्वक 'वस' धातुके योगमें 'उपान्वध्याङ्वस' इससे कर्मसंज्ञा होकर द्वितीया हुई है ।

अध्युवास=अधि-पूर्वक "वस निवासे" धातुके लिट् के प्रथम पुरुषका एक वचन है "लिट्यभ्यासस्योभयेषाम्" इससे अभ्यासका संप्रसारण हुआ है ।

प्रहर्षिणी छन्द है, उसका लक्षण है—"म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ७९ ॥

इति श्रीमहाकविकालिदासकृतौ महाकाव्ये रघुवंशे शेषराजशर्मकृत-चन्द्रकलाभिख्यव्याख्यायां त्रयोदशः सर्गः ।